

दशरूपकप्रभा



लेखकः
डॉ. सुरेशकुमार टी. व्यासः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्-गुजरातम्
Shree Somnath Sanskrit University-Veraval-Gujarat
2013

काव्यगुणादर्शे

॥ दशरूपकप्रभा ॥

प्रधानसम्पादकः

प्रो. वेम्पटि कुटुम्बशास्त्री

लेखकः

- डॉ. सुरेशकुमार टी. व्यासः

प्रकाशनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाषः - ०२८७६ - २४४५३२,३३ फेक्स : २४४४१७

www.shreesomnathsanskrituniversity.org

प्रकाशकः -

डॉ. दशरथः जादवः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५

जुनागढजनपदम् (गुजरात)

प्रथमं संस्करणम्

फरवरी, २०१३

प्रतयः

३००

ISBN

978-93-83097-09-8

मूल्यम्

रु.५०/-

मुद्रकः

एच. के ओफसेट, वेरावलम्

।। शुभाशंसनम् ।।

विद्यायाः प्रकाशनं बहुविधं भवति। कदाचित् अध्यापनेन, कदाचित् अध्ययनेन, कदाचित् प्रवचनेन च। परन्तु उपर्युक्ताः प्रकाशनमार्गाः अपेक्षितविद्याप्रकाशनं न कुर्वन्ति यावद्ग्रन्थप्रकाशनं विद्याप्रकाशनं जने–जने करोति। अत एवोक्तम् ''पुस्तकी भवति पण्डितः''। अर्थात् यस्य पार्श्वे पुस्तकानि बहूनि विविधानि च भवन्ति स पण्डितो भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः एकत्र तु संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे समर्पितकालो वर्तते तदाऽन्यत्र नूतनसाहित्यसर्जनां कारयितुं तस्याश्च प्रकाशनं कारयितुं दत्तावधानोऽस्ति। अस्मिन्नेव शुभे पुण्ये च सन्दर्भे **'उज्जयिनीनगरे'** आयोजिते **''संस्कृतसाहित्योत्सवे'** श्रीसोमनाथसंस्कृतविश्वविद्यालयः बहूनां ग्रन्थानां प्रकाशनं करोति। अध्यापकानां छात्राणां च कृते **काव्यगुणादर्शे दुशंरूपकप्रभा** नामधेयः ग्रन्थोऽयं महते लाभाय भविष्यति। अस्य ग्रन्थस्य प्रसाराय अहं शुभाशंसनं प्रकटीकरोमि।

।। जयतु सोमनाथः जयतु संस्कृतम् ।।

प्रो. वी. कुटुम्बशास्त्री

कुलपतिः

ग्रन्थकर्तुः परिचयः

<u>परिचयः</u>-> दशरूपकस्य रचयिता श्रीधनञ्जयोऽस्ति। संस्कृतसाहित्ये प्रायः प्राचीनाः लेखकाः स्वपरिचये मौनं भजन्ते परमत्र श्रीधनञ्जयः अपवादरूपः यतो हि सः स्वयमेव ग्रन्थस्यान्तभागे निबद्धे श्लोके स्वपरिचयं ददाति। यथा -

विष्णोः सुतेनापि धनञ्जयेन विद्वन्मनोरागनिबन्धहेतुः।
आविष्कृतं मुञ्जमहीशगोष्ठी वैदग्ध्यभाजा दशरूपमेतत् ॥

श्लोकेऽस्मिन्निरूपितं यत् श्रीधनञ्जयः मालवादेशस्य परमारवंशस्य नृपस्य मुञ्जस्य राजसभायां राजकविः आसीत्। अस्य च पितुर्नाम श्रीविष्णुरासीत्। मुञ्जराजा स्वयं वीरः कविश्च तस्मादनेकेषां विदुषां कवीनाञ्च आश्रयदाता। अस्याश्रये तिलकमञ्जरीकारः धनपालः नवसाहसाङ्कचम्पूकाव्यकारः पद्मगुप्तश्च आस्ताम्।

<u>समयः</u>

अनेकैः प्रमाणैः अस्य श्रीधनञ्जयस्य समयः दशमशताब्द्याः उत्तरार्धः इति सिद्धं भवति तत्र प्रमाणानि यथा -

१ रुद्रटस्य काव्यालङ्कार एकः श्लोकः यथा -

रसनाद् रसत्वमेतेषां मधुरादीनामिवोक्तमाचार्यैः।
निर्वेदादिष्वपि तत्प्रकाशममस्तीति तेऽपि रसाः ॥

अयं शान्तरसस्य विवेचने दशरूपके अवलोके स्वीकृतोऽस्ति। दशरूपकेऽपि

निर्वेदादितराद् रूप्याद् अस्थायी स्वदते कथम्।
वैरस्यायैव तत्पोषः तेनाष्टौ स्थायिनो मताः ॥

अत्र च काव्यालङ्कारस्य सङ्केतः दृष्टिपथं समायाति। अपि च अवलोके ध्वन्यालोकस्य **"यत्रार्थः शब्दो वा"** इत्यादि तथा **"प्राध्तन्येऽन्यत्र वाक्यार्थे"** इत्यादि कारिकाद्वयम् उदाहृतमस्ति। आभ्यां च उदाहरणाभ्यां रुद्रटस्य समयः ८५० ई, आनन्दवर्धनाचार्यस्य च समयः ८६० ई तः ८९० ई यावत् निश्चितोऽस्ति अतः धनञ्जयः तत्परवर्ती दशमशताब्दीसंभव इति निश्चितं भवति।

रचना

श्रीधनञ्जयस्य रचना एकैव दशरूपकम् इति नाम्नी वर्तते। अस्य च रचनाप्रकारः आचार्यस्य श्रीभरतस्य नाट्यशास्त्रम् नायिकाभेदप्रतिपादने श्रृङ्गाररसनिरूपणे च ईषद् भिन्नः विचारः।

फलम्

दशरूपकस्य प्रमुखं लक्ष्यं वस्तु-नायकभेद-रसप्रतिपादनमेवास्ति उत दशरूपकाणां भेददर्शनमस्ति।

उपसंहारः

साहित्यशास्त्रे नैके लक्षणग्रन्थाः साहित्यदर्पणकाव्यप्रकाशादयः सन्ति परन्तत्र सर्वेऽपि विषयाः विस्तृतरूपेण वर्णितास्सन्ति। दशरूपके तु तन्नाम्नैव ज्ञायते यत् नाटकादिदशरूपकाणाम् एव प्राधान्येन अत्र विस्तृताचर्चा। अतः प्रधानतमोऽयं नाट्यशास्त्रस्य ग्रन्थोऽस्ति।

ग्रन्थसारांशः

श्रीधनञ्जयकविविरचितः दशरूपकनामा ग्रन्थः वर्तते। अत्र चत्वारः प्रकाशास्सन्ति तेषु यथाक्रमं प्रकाशपरिचयं लिखामि।

प्रथमः प्रकाशः

प्रथमे प्रकाशे सर्वप्रथमं –

नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते।
मदाभोगघनध्वानो नीलकण्ठस्य ताण्डवे॥

इति श्रीगणेशं नत्वा मङ्गलमिदं विधाय विष्णुं भरतमुनिं च प्रणम्य नाट्यलक्षणं रूपकलक्षणं तद्भेदाश्च दश निरुपिताः धनञ्जयेन।

ततश्च नृत्यनृत्तयोः भेदः, नाट्यनृत्ययोर्भेदः, वस्तुनः स्वरूपं, पताकास्थानकस्य विवेचनं पञ्चावस्थानिरूपणं, अवस्थार्थप्रकृतयोः भेदः, मुख-प्रति-गर्भ-विमर्श-उपसंहृतीनां पञ्चसन्धीनां सोदाहरणं निरूपणं, अर्थोपक्षेपकमूल्यं भेदाश्च,

नाटकप्रतिपादद्यानां प्रकाश-स्वागत-जनान्तिकापवारितादीनां लक्षणानि च अत्यन्तं स्पष्टरूपेण तर्कबद्धदृष्ट्या च पूर्वनिरूपितं सर्वं श्रीधनञ्जयेन निरूपितम् । अत्र अष्टाषष्टिसंख्याकाः (६८) कारिकाः सन्ति।

द्वितीयः प्रकाशः

द्वितीये प्रकाशे रूपकाणां परस्परं भेदोऽस्ति इति प्रतिपादनाय वस्तुनः भेदं निरूप्य साम्प्रतं नायकभेदः प्रतिपाद्यते धनञ्जयेन यथा तल्लक्षणं प्रतिपादितम्।

नेता विनीतो मधुरः त्यागी दक्षः प्रियंवदः ।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ॥

तत्र विनीतः यथा महावीरचरिते श्रीरामचन्द्रः । इत्यादिभिः लक्षणोक्तानि सर्वाण्यपि पदानि सर्वत्र सङ्गमितानि।

ततश्च नायकस्य चत्वारः भेदाः

"भेदैश्चतुर्धा ललितशान्तोदात्तोद्धतैः।"

अनेन पद्येन प्रतिपादिताः । तदनन्तरं चतुर्णामपि नायकानां लक्षणोदहरणानि सविस्तरं निरूप्य पुनः षोडशानामपि प्रत्येकं ज्येष्ठमध्यमाधमत्वेन अष्टचत्वारिंशन्नायकभेदाः च नायकगुणाः, नायकसहायाः, प्रतिनायकलक्षणं भेदाश्च निरूपिताः सन्ति।

ततश्च "नेता विनीतो" इत्यादयो नायकसामान्यगुणा एव नायिकासामान्यायाः भवन्ति इति पृथग्गणना नैव धनञ्जयेन विहिता तत्र प्रथमं नायिका त्रिप्रकारका यथा –

(१) स्वकीया (२) परकीया (३) साधारणा

पुनश्च स्वीया त्रिप्रकारका यथा –

(१) मुग्धा (२) मध्या (३) प्रगल्भा

तत्र परकीया नायिका द्विप्रकारा यथा –

(१) अपरिणीता कन्यका (२) अन्येन परिणीता स्त्री

इत्थं भेदप्रभेदैः द्वादशप्रकारा नायिकेति धनञ्जयस्य युक्तियुक्तं सर्वसम्मतं मतमस्ति।

पश्चात् नायिकानां अष्टावस्थायाः निरूपणं, तासां सहायकर्त्रीणां वर्णनं कृत्वा तासाम् अलङ्काराणां विवेचनं विहितमनेन।

ततश्च वृत्तिसामान्यलक्षणं निरूप्य कैशिकी-सात्वती-आरभटीवृत्तीनां लक्षणोदाहरणानि प्रस्तूय रसानुकारमपि वृत्तिनिरूपणं, नाट्यप्रवृत्तीनां, विवेचनं, भाषाप्रयोगनियमाः, आमन्त्रणनियमाश्च सयुक्तियुक्तं प्रतिपादिताः सन्ति।
अत्र द्विसप्ततिः (७२) कारिकाः सन्ति।

इति द्वितीयप्रकाशसारांशः ।

तृतीयः प्रकाशः

तृतीये प्रकाशे रसनिरूपणं सम्प्राप्तं परन्तु तत्पूर्वं वस्तु-नेतृ-रसभेदाधारेण नाटकादिरूपकाणां वर्णनं च तत्रैतेषां उपयोगः कथं भवतीति साधयितुं नाटकादिदशरूपकाणां सूचिकटाहन्यायेन धनञ्जयः निरूपणमारब्धवान्।
यथा-

प्रकृतित्वादथान्येषां भूयोरसपरिग्रहात्।
सम्पूर्णलक्षणत्वाच्च पूर्वं नाटकमुच्यते॥

तत्र सूत्रधारः पूर्वरङ्गं कृत्वा निर्गच्छति तदा स्थापकः काव्यं स्थापयेदिति। स च स्थापकः दिव्यं वस्तु दिव्यो भूत्वा, मर्त्यं च मानवो भूत्वा, मिश्रं दिव्यमर्त्ययोः अन्यतरो भूत्वा स्थापयेत्।

तत्र प्रथमं काव्यार्थं मधुरैः श्लोकैः सूचयित्वा सभ्यान् च प्रसन्नान् विधाय यां कामपि ऋतुमादाय भारतीवृत्तेः प्रयोगः कर्तव्य इति।

ततश्च आमुखलक्षणं विधाय प्रस्तावनामेनैव आमुखं प्रतिपाद्य कथोद्धात-प्रवृत्तक-प्रयोगातिशया इति त्रीणि अङ्गानि निरूपितानि च वीथ्याः त्रयोदशाङ्गानि

वर्णितानि। इत्त्थमाहत्य चतु:,षष्टि अङ्गानि लक्षितानि।

धनञ्जयेन नाटके प्रधाना रसः एक एव भवितुमर्हतीति प्रतिपादितं तत्रापि श्रृङ्गारवीराभ्यामेव एकः प्रधानः अन्ये रसाः सहायकाः भवन्ति। निर्वहणसन्धौ च अद्भुतः रसः ग्राह्यः।

ततश्च- **अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम्**। इति द्वाभ्यां कारिकाभ्यां प्रकरणलक्षणं तत्र शेषं नाटकवन्मतमित्युक्तम्।

भाणस्तु धूर्तचरितम् इत्यादि पञ्चकारिकाभिः भाणलक्षणम्, च

तद्वत्प्रहसनं त्रेधा इत्यादिना प्रहसनं प्रतिपाद्य,

डिमे वस्तु प्रसिद्धं स्यात् इत्यनेन डिमनिरूपणम्,

ख्यातेतिवृत्तो व्यायोगः इति व्यायोगवक्षणं,

कार्ये समवकारेऽपि इत्यनेन समवकारलक्षणम्,

वीथी तु कैशिकीवृत्तौ इत्यादिभिः वीथीनिरूपणम्,

उत्सृष्टिकाङ्के प्रख्यातम् इत्यादिभिरङ्कस्य विवेचनम्,

मिश्रमीहामृगे वृत्तम् अनेन च दशमस्येहामृगस्य लक्षणं लक्षितमस्ति।

अत्र षट्सप्ततिः (७६) कारिकाः सन्ति।

इति तृतीयप्रकाशसारांशः

चतुर्थप्रकाशसारांशः

श्रीधनञ्जयः चतुर्थे चान्तिमे प्रकाशे काव्यात्मभूतं रसं चर्चयति। यथा –

विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः।
आनीयमानः स्वाद्यत्वं स्थायीभावो सचेतसाम्॥

विभावेन, अनुभावेन, सात्त्विकभावेन, व्यभिचारिभिश्च रत्यादिः स्थायीभावः आस्वाद्यः क्रियते स एव रसपदवाच्यः।

अत्र रसलक्षणे प्रायोऽलङ्कारप्रवर्तकाः समेऽपि आचार्यप्रवराः नाट्यशास्त्रकर्तारं

भरतमुनिमेवानुसरन्ति तेन रससूत्रं निरूपितं यथा –

"विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः इति"

साहित्यदर्पणकारः विश्वनाथः अपि दर्पणे रसलक्षणं सूत्रव्याख्यानरूपमेव प्रतिपादयामास यथा –

विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।
रसतामेति रत्यादिः स्थायीभावः रसः स्मृतः ॥

धनञ्जयोऽपि सूत्रमिदमेवानुसरति रसलक्षणे इति प्रतिभाति ।

धनञ्जयेन ततश्च विभावलक्षणं, अनुभावलक्षणं, व्यभिचारिभावः तद्भेदाश्च, स्थायिभावभेदलक्षणादिकञ्च, प्रतिपाद्य श्रृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-अद्भुत-बीभत्साः अष्टौ रसाः सभेदाः सलक्षणोदाहरणाः विवेचिताः सन्ति च तत्र शान्तरसचर्चाऽपि विहिता ।

अत्र चतुरशीतिः (८४) कारिकाः सन्ति ।

अत्र प्रथमे ६८, अत्र द्वितीये ७२, अत्र तृतीये ७६, अत्र चतुर्थे ८४

३०० कारिकाः सन्ति । आहत्य त्रिशतं कारिकासमन्वितोऽयं ग्रन्थः ।

इति चतुर्थः प्रकाशः ।

ग्रन्थनामसारर्थकता

ग्रन्थस्य नामास्ति दशरूपकम् अस्य च विग्रहः दश रूपकाणि यस्मिंस्तत् दशरूपकम् ।

दश चात्र संख्याद्योतकः शब्दः, रूपकमिति च आरोपो रूपकं भवति । आरोपः अतस्मिन् तत् तादात्म्यबुद्धिः । यथा मुखे (अचन्द्रे) चन्द्रस्य विश्वासः । अयं हि आरोपः रूपकालङ्कारस्य बीजमस्ति अतः आरोपे सति रूपकं भवति । तथैव अनुकर्तरि नटे अवस्थायाः अनुकरणसाम्राज्याद् अनुकार्यस्य तादात्म्यप्रतीतिः भवति तस्माद् रूपकमिति कथ्यते "रूपकं तत्समारोपात्" इति ।

एषु परस्परं भेदः

यद्यपि सामान्यदर्शनेन नाट्यं, रूपं, रूपकमिति अपरपर्यायमात्रं वर्तते । यन्नाट्यम्, तदेव रूपकं, रूपञ्चेति । यथा एकस्यैव विष्णोः नारायणः, पद्मनाभः, लक्ष्मीकान्त इत्यादयः पर्यायाः सन्ति । सूक्ष्मदृष्ट्या अवलोकनेन ज्ञानं भवति यत् कोऽपि शब्दः कस्यापि शब्दस्य समानार्थी भवति न पर्यायः ।

एवमत्र नाट्यरूप-रूपकशब्दानां श्रवणेन दृश्यकाव्यस्य बोधः भवति परमत्र शब्दस्य ध्वनिः भेदं प्रदर्शयति । यथा एतेषां लक्षणवाक्यैः "**अवस्थानुकृतिर्नाट्यम्**" "**रूपं दृश्यतयोच्यते**" "**रूपकं तत्समारोपात्**" परस्परं भेदोऽस्तीति ज्ञानं भवति ।

ग्रन्थप्रयोजनानि शैली च

प्रयोजनानि – सर्वत्र एका सूक्तिः प्रसिद्धा वर्तते यत् "निष्कारणं मन्दोऽपि न प्रवर्तते" अपि च "विना कारणं न कार्योत्पत्तिः" इति द्वाभ्यां सिद्धान्ताभ्यां फलितं भवति यत् दशरूपक-रचनायां के हेतवः स्थिताः ? इति जिज्ञासा समुदेति तस्याश्च समाधानाय मङ्गलान्ते धनञ्जयः एकं श्लोकं समुपस्थापयति यथा–

उद्धृत्योद्धृत्यसारं यमखिलनिगमान् नाट्यवेदं विरिञ्चिः
चक्रे यस्य प्रयोगं मुनिरपि भरतः ताण्डवं नीलकण्ठः ।
शर्वाणी लास्यमस्य प्रतिपदमथवा लक्ष्म कः कर्तुमीष्टे
किन्तु किञ्चित्प्रगुणरचनया लक्षणं संक्षिपामि ॥ इति ।

भारतीयशास्त्रपरम्परायां चत्वारः अनुबन्धाः स्वीकृताः सन्ति यथा –

(१) विषयः (२) अधिकारी (३) सम्बन्धः (४) प्रयोजनञ्च ।

अस्य दशरूपकस्य ग्रन्थस्य विषयोऽस्ति नाट्यवेदस्य संक्षेपीकरणम् । अस्य च ग्रन्थस्य अधिकारी कः इत्यस्य समाधानं पञ्चमकारिकया करोति यथा –

"**व्याकीर्णे मन्दबुद्धीनां जायते मतिविभ्रमः** "

सुकुमारकोमलमतयः अल्पमतयश्चात्र अधिकारिणः सन्ति ।

नाट्यवेददशरूपकयोश्चात्र सम्बन्धः वर्तते तेनैव सह प्रयोजनञ्चास्य

आनन्दास्वादनमिति धनञ्जयः प्रत्यपादयत्।

शैली

नाट्यशास्त्रदृष्ट्या श्रीधनञ्जयस्य दशरूपकं महत्त्वपूर्णः ग्रन्थः वर्तते अत्र कारणं चास्य ग्रन्थस्य सरलं सरसञ्च विषयनिरूपणं प्रतिपादनशैली च । अत्र दशरूपकाणां सिद्धान्ताः संक्षिप्ता अपि सर्वाङ्गपरिपूर्णाः निरूपिताः सन्ति । ग्रन्थोऽयं साहित्यदर्पणादीनाम् उपजीव्यः ग्रन्थः वर्तते।

दशरूपके ज्ञातव्यविषयाः

श्रीधनञ्जयाचार्यविरचिते दशरूपकनाम्नि ग्रन्थे प्रारम्भे भगवतः श्रीगणेशस्य मङ्गलं दृश्यते। तद्यथा –

नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते ।
मदाभोगधनध्वानो नीलकण्ठस्य ताण्डवे ॥

ग्रन्थेऽस्मिन् चत्वारः प्रकाशाः वर्तन्ते तत्र प्रत्येकस्मिन् क्रमेण अष्टषष्टि(६८) द्विसप्तति(७२) षट्सप्तति(७६) च चतुरशीति(८४) कारिकाः सन्ति । कारिकाणां समस्तसंख्या त्रिशतमस्ति (३००)।

अत्र "**अवस्थानुकृतिः नाट्यम्**" इति नाट्यलक्षणं लक्षितमस्ति, इदं हि नाट्यं दृश्यतया रूपकपदेनापि कथ्यते। एतानि रूपकाणि नाटक–प्रकरण–भाण–प्रहसन–डिम–व्यायोग–समवकार–वीथि–अङ्क–ईहामृगभेदैः दशप्रकारकाणि भवन्ति।

नृत्यलक्षणं च "**अन्यद्भावाश्रयं नृत्यम्**" इति निरूप्य वस्तु–नायक–रसभेदाद् रूपकाणामपि परस्परं भेद इति भेदकारणं प्रस्तुतम् । तत्र वस्तुनः द्वैविध्यं स्वीकृत्य तद् आधिकारिकं प्रासङ्गिकञ्चेति निरूपितमस्ति।

अर्थबिन्दु–पताका–प्रकरी–कार्यभेदैः पञ्च अर्थप्रकृतयः प्रतिपादिताः च **आरम्भ–यत्न–प्राप्त्याशा–नियताप्ति–फलागम**भेदैः पञ्च अवस्थाः निरूपिताः सन्ति।

ततश्च सन्धेः लक्षणं प्रतिपाद्य **मुख–प्रतिमुख–गर्भ–अवमर्श–उपसंहार**भेदैः

तस्य पञ्चविधत्वं पूर्वाचार्यमतानुसारमेव स्वीकृतमत्र ग्रन्थे।

अग्रे च द्वितीये प्रकाशे-

नेता विनीतो मधुरः त्यागी दक्षः प्रियंवदः।

रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा॥

एवंरूपेणात्र नायकलक्षणं निरूप्य पूर्वं **ललित-शान्त-उदात्त-उद्धत**भेदैः चतुष्प्रकारकः सः नायकः भवति इति निरूपितम्।

नायिकापि **स्वकीया-परकीया-साधारणेति** त्रिविधा प्रतिपादिता तत्र च यौवने सत्त्वोद्भूताः विंशतिरलङ्काराः स्त्रीणां भवन्ति इत्यपि निरूपितम्। तत्रैव **कैशिकी-सात्वती-आरभटी-भारतीति** चतस्त्रः वृत्तयः सलक्षणोदाहरणं निवेशिताः सन्ति।

तृतीये प्रकाशे दशरूपकाणां सलक्षणोदाहरणं विशदं च विवेचनं विधाय चतुर्थे अष्टरसानां भक्तिरसम् अस्वीकृत्य स्थापनां कृतवान् अचार्यः धनञ्जयः।

इत्थञ्चं ग्रन्थोऽयं दशरूपकाणां ज्ञातव्यविषये सर्वथा सरलः सर्वजनवेद्यश्च वर्तते।

नाट्य-रूप-रूपकविवेचनम्

तत्र सर्वप्रथमं नाट्यं किमिति जिज्ञासा समुद्भवति अस्य प्रश्नस्य समाधानाय नाट्ययस्य व्याख्या का इति विचार्यते।

नाट्यम्-

नाट्यं नाम काव्येषु स्थापितानां धीरोदात्त-धीरोद्धत-धीरलरित-धीरप्रशान्तानां चतुर्विधानां नायकानाम्, तेषामेव लक्षणैः लक्षितानां नायिकानाम्, अन्येषाञ्च पात्राणां आङ्गिक-वाचिकाऽहार्यसात्त्विकैः चतुर्विधैः अभिनयैः वेषभूषाऽऽलापप्रलापादीनाम् अवस्थाया अनुकरणमिति। यथा -

"अवस्थानुकृतिर्नाट्यम्" इत्यस्मिन् तल्लक्षणे श्रीधनञ्जयः प्रतिपादितवान्।

अपरञ्च रूपमस्ति तच्च चतुरिन्द्रियविषयत्वमेव सामान्येन रूपत्वमिति यद्यद् चक्षुषा गृह्यते तत्तत्सर्वं रूपपदेन कथ्यते यथा नीलपीतादिरूपम्। अनेनैव प्रकारेण अनुकर्ता

द्वारा प्रतिपादितस्य अनुकार्यस्य अनुकरणं भवति तदा रङ्गमञ्चविषयतया अभिनयविषयीभूतं सत् सामाजिकानां चक्षुरिन्द्रियविषयतां प्राप्नोति तदा रूपमिति कथ्यते।

रूपम्—

"रूपं दृश्यतया उच्यते" एवं रूपस्य दशरूपके लक्षणं प्रतिपादितमस्ति तदपि अनेन सफलं भवति।

रूपकम्—

आरोपः रूपकं भवति । आरोपस्य अर्थः यस्मिन् यन्नास्ति तस्मिन् तद्कल्पनाबुद्धिः। यथा कुचयो(अघटयोः) घटत्वस्य विश्वासः कल्पना वा। अयमेवारोपः रूपकालङ्कारस्य मूलमस्ति।

उक्तञ्च साहित्यदर्पणे

"रूपकं रूपितारोपाद् विषये निरपह्नवे"

तथैव अनुकर्ता यः नटः तस्मिन् अवस्थानुकरणसाम्राज्याद् सः यस्य अनुकरणं करोति तस्य तादात्म्यप्रतीतिरपि रूपकमेव भवति। उक्तञ्च

"रूपकं तत्समारोपात्" इति।

नाट्यरूप-रूपकपरस्परभेददर्शनम्

समाजे सामान्यरूपेण दृश्यते चेत् त्रयाणामपि नाट्य-रूप-रूपकाणां अपरपर्यायत्वेन स्वीकारः भवति, नाट्यमेव रूपम्, तदेव रूपकमिति । यथा शङ्करस्य पिनाकपाणिः, शिवः, उमापतिः इत्यादयः पर्यायाः सन्ति।

सूक्ष्मेक्षणेन ज्ञानं भवति यद् कस्यापि शब्दस्य कोऽपि शब्दः समानार्थी भवति किन्तु वास्तविकरूपेण तस्य पर्यायः न भवति। यथा ब्राह्मणस्य विप्र-द्विज-भूदेव-गुरु-भूसुरादयः पर्यायाः तत्र शब्दस्थितो यो ध्वनिः तेनैव अस्य भिन्नः भिन्नः अर्थः सिद्धो भवति।

अनेनैव प्रकारेण एतेषां त्रयाणां दृश्यकाव्यत्वेन व्यवहारः भवति तथापि एतेषां यः

शब्दध्वनिः सः एषु त्रिषु भेदं जनयति। अयञ्च भेदः एतेषां त्रयाणां लक्षणेभ्यः स्पष्टरूपेण ज्ञातः भवति। यथा "**अवस्थानुकृतिः नाट्यम्**" "**रूपं दृशयतया उच्यते**" "**रूपकं तत्समारोपात्**" इति।

इत्थं एषु परस्परं भेदोऽस्तीति स्पष्टं भवति।

अर्थप्रकृतिविवेचनम्

अर्थप्रकृतिव्याख्यानं सारल्येन एवं कर्तुं शक्नुमः। याभिः कथानके प्रयुक्तस्य प्रयोजनस्य फलस्य सिद्धिः भवति सा अर्थप्रकृतिः। इयं च अर्थप्रकृतिः प्रयोजनसिद्धिहेतुभूतास्ति।

दशरूपककारः धनञ्जयः पञ्च अथप्रकृतीः निरूपितवान्। तासां नामानि यथा –

(१) **बीजम्** (२) **बिन्दुः** (३) **पताका** (४) **प्रकरी** (५) **कार्यम्**।

अधुना क्रमेण पञ्चानां लक्षणस्वरूपं जानीमः। तत्रादौ

(१) बीजम् –

श्रीधनञ्जयः बीजलक्षणं लक्षयति यथा –

स्वल्पोद्दिष्टस्तु तद्धेतुर्बीजं विस्तार्यनेकधा।

स्वल्परूपेण कथितः हेतुः कथानकस्य फलस्य साधको भवति यथा सूक्ष्ममपि बीजं अङ्कुरितं वृक्षरूपेण वर्द्धितं अनेकशाखातया विस्तारि भवति तथैव नाट्यस्य कथायाः कार्यसाधकः यो हेतुः पूर्वं स्वल्परूपेण निर्दिष्टः पश्चाद् अनेकप्रकारैः विस्तारितो भवति सः बीजपदेन आलङ्कारिकैः कथ्यते।

उदाहरणम्

यथा वेणीसंहारे नाटके द्रौपद्याः केशसंयमनं(वेणीसंहारः) नाटकस्य फलमस्ति। अस्य सूक्ष्मः हेतुः भीमस्य क्रोधोद्दीपितः युधिष्ठिरस्य उत्साहः

"**क्रोधज्योतिरिदं महत्कुरुवने यौधिष्ठिरं जृम्भते**" इति नाटकस्य बीजं वर्तते।

(२) बिन्दुः –

"अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्"

इति बिन्दुलक्षणम् अस्यार्थः यथा यत्र अन्येन अर्थेन विभक्तं कथानकं पुनः योजयितुं किमपि कारणं योज्यते तत्र बिन्दुः।

नाट्याचार्याः अन्यकार्यहेतुभूतं बीजमेव बिन्दुत्वेन कथयन्ति। अयं हेतुः जले तैलाबिन्दुवत् प्रसृतो भवति।

उदाहरणम्

यथा रत्नावल्यां वासवदत्ताविहिता कामपूजा अवान्तरकथा वर्तते। अनेन कथा भग्ना भवति पुनः तां संयोजयितुं नेपथ्यतेः "**उदयनस्य इन्दोः इव उद्वीक्षते**" अनेन रत्नावल्या "**किमयमेव राजा उदयनः**" इति कथनं संयोजितमस्ति।

(३) पताका–

"सानुबन्धं पताकाख्यम्"

इति दशरूपके पताकालक्षणं प्रतिपादितमस्ति। अर्थश्चास्य साभिप्रायं किमपि कारणविशेषं गृहीत्वा प्रचरति सा पताका।

उदाहरणम्

यथा रामायणे सुग्रीवविभीषणयोः वृत्तान्तं दूरं यावत् प्रचलति। यथा ध्वजा नायकस्य सूचिका भवति तथैव आधिकारिकं कथानकं नायकञ्च पोषयति सापि पताका कथ्यते।

(४) प्रकरी–

"प्रकरी च प्रदेशभाक्"

यद् कथानकं लघु कथानकस्य एकदेशानुसारि च भवति तत् प्रकरीपदेन कथ्यते।

उदाहरणम्

यथा रामायणे शबरीवृत्तान्तं समायाति तच्च वृत्तान्तं एकदेशानुसार्यतः प्रकर्या उदाहरणत्वेन सङ्गच्छते।

(५) कार्यम्–

"**कार्यं त्रिवर्गः**"धर्मार्थकामरूपं नाट्यस्य फलमेव कार्यमिति फलति धनञ्जयमते। नाट्यकार्येषु क्वचिदेकस्य, द्वयोः, त्रयाणां वा सिद्धिः भवति।

इत्थं दशरूपके श्रीधनञ्जयः अर्थप्रकृतीः लक्षितवानिति शम्।

शास्त्रीयशब्दप्रकाशः

केचन शब्दाः शास्त्रीयाः भवन्ति तेषाञ्चार्थज्ञानं तच्छास्त्रस्य ज्ञानं विना न भवति यथा – "**योगेन दलिताशयः**" अत्र आशयशब्दः योगशास्त्रीयः अतः योगशास्त्रज्ञ एव तस्य वासनारूपम् अर्थं कर्तुं शक्नोति नान्यशास्त्रज्ञः।

तथैव साहित्यशास्त्रेऽपि नाटकादिषु केचन पारिभाषिकाः शब्दाः भवन्ति तेषाम् अर्थज्ञानं प्राप्नुमः। यथा –

(१) प्रकाशम्

"**सर्वश्राव्यं प्रकाशं स्यात्**" इति लक्षणं प्रकाशस्य दशरूपके दृश्यते।

रङ्गमञ्चे यदा नायकनायिकाद्याः चरितं प्रस्तुवन्ति तदा कथनं सर्वैरपि सामाजिकैः पात्रैः वा श्रोतुं याग्यं भवेत्तदर्थं सुस्पष्टं कथोपकथनमेव "**प्रकाशम्**" इत्युच्यते।

(२) स्वगतम्

"**अश्राव्यं स्वगतं मतम्**"

पात्राणि रङ्गमञ्चे स्वकार्याणि प्रस्तुवन्ति तदा योंऽशः सर्वैः श्रोतुं योग्यः नास्ति अतः तानि परस्परं तं नोक्त्वा मनसि यद् विचारयन्ति तत् "**स्वगतं**" कथ्यते।

(३) जनान्तिकम्

"**अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम्**"

यत्र रङ्गमञ्चे अन्यानि पात्राणि भवन्ति तथापि पात्रद्वयं परस्परं तथा चर्चां करोति येन अन्यः तत् श्रोतुं न शक्नोति। नाट्याचार्याः तत् "**जनान्तिकं**" कथयन्ति।

(४) अपवारितम्

"**रहस्यं कथ्यतेऽन्यस्य परावृत्त्यापवारितम्**"

यत्र स्वस्य मुखं अन्यदिशं प्रति नीत्वा अन्यस्य पात्रस्य रहस्यात्मकं कथनं कथ्यते

तत् "**अपवारितम्**" इति कथ्यते।

एवमेव अन्येषां शब्दानामपि शास्त्रदृष्ट्या अर्था ज्ञेयाः तदर्थञ्च शास्त्राध्ययनं जिज्ञासया कर्तव्यमिति।

नायकविमर्शः

नेता कीदृशः ? इत्यस्य प्रश्नस्य चर्चां सर्वेऽप्यालङ्कारिकाः स्वस्वग्रन्थेषु कृतवन्त तथैव दशरूपककारः श्रीधनञ्जयोऽपि नेतारं लक्षयति। यथा –

नेता विनीतो मधुरः ——————— ॥

नायकः (१) विनम्रः – विनयसम्पन्नः यथा परशुरामम्प्रति श्रीरामः,

(२) मधुरः – मधुरस्तु प्रियदर्शनः जननयनाकर्षकः यथा महावीरचरिते श्रीरामः हृदयङ्गमः,

(३) त्यागी – सर्वदाता त्यागी भवति यथा कर्ण–दधीच्यादयः,

(४) दक्षः – दीर्घसूत्रतां त्यक्त्वा यः शीघ्रकारी सः दक्षः कथ्यते यथा

"**स्फूर्जद्वज्रसहस्त्रनिर्मितमिव प्रादुर्भवत्यग्रतः**" अत्र श्रीरामस्य क्षिप्रत्वम्।

(५) प्रियंवदः – प्रियं वदतीति व्युत्पत्त्या प्रियभाषी नायकः प्रियंवदता चास्य विशिष्टो गुणः। यथा –

"**उत्पत्तिर्जमदग्नितः स भगवानिति**"

(६)रक्तलोकः – रक्तः अनुरक्तः प्रसादितो लोकः येन सः, लोकप्रियः लोकहितकारक इति। यथा –

"**त्रय्यास्त्राता——————**।"

(७) शुचिः – नायकः पवित्रः स्यादिति भावः। यथा –

"**का त्वं शुभे कस्य परिग्रहो वा**"

(८) वाग्मी – नायकः वाक्पटुः भवति। यथा हनुमन्नाटके रामः परशुरामं प्रति –

"**बाहोर्बलं न विदितं न च कार्मुकस्य**"

(९) रूढवंशः – नायकः सामान्यकुलोत्पन्नः न भवत्यपितु उच्चकुलोत्पन्नः । यथा–

श्री रामः

(१०) स्थिरः – नायकः मनसा वचा क्रियया च अचलो स्थिरो भवति । यथा– **श्री रामः ।**

"आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा"

अनेनैव सह नायकः बुद्धिमान्, सोत्साहः, प्रज्ञावान्, कलानिपुणः, मानदः, शूरः, दृढः, तेजस्वी, शास्त्रचक्षुः धार्मिकश्च स्यादिति नायकविमर्शः ।

रसस्वरूपस्फोरणम्

रसस्वरूपविषये सर्वप्रथमं सर्वसम्मतञ्च मतमस्ति आचार्यभरतस्य । तेनाचार्यवरेण नाट्यशास्त्रे रससूत्रं ग्रथितं तद्यथा–

"विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" इति ।

अनुगामिनः सर्वेऽप्यालङ्कारिकाः प्रायः रसविषये अस्यैव सूत्रस्य व्याख्यां छन्दोबद्धताञ्च अकुर्वन्निति अन्येषां रसस्वरूपदर्शनेन स्पष्टं प्रतिभाति । तत्र धनञ्जयोऽपि नापवादः । तन्मते रसलक्षणं यथा –

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
आनीयमानः स्वाद्यत्वं स्थायीभावः रसः स्मृतः ॥

अस्यार्थस्तु विभावैः, अनुभावैः, सात्त्विकभावैः, व्यभिचारिभिश्च स्वाद्यत्वम् आनीयमानः स्थायीभावः रसरूपतां प्राप्नोति ।

अत्रायमाशयः रत्यादयः स्थायिभावाः सामाजिकानां हृदये जन्मत एव सिद्धाः भवन्ति । ते च स्वानुकूलान् विभावादीन् आदाय तत्तद्रसतां प्राप्नुवन्ति । यथा मृत्तिकायां पतितं बीजं जलवातावरणादिकं प्राप्य समये स्वयमेव प्रस्फुटितं भवति तद्वद्रसोऽपि भवति ।

पूर्वं विभाव एव रसरूपतया सिद्ध आसीत्–

"विभाव एव रसः"

तदनन्तरम् अनुभावः रसरूपेण ततश्च व्यभिचारिभावः रसरूपेण स्वीकृतोऽभवत् -

"व्यभिचारिभावः एव रसः"

ततश्च भरतमुनिः पूर्वोक्तं रससूत्रं साररूपेणऽदात् ।

दशरूपककारेण श्रीधनञ्जयेन सूत्रेऽस्मिन् एकं वैशिष्ट्यं नूतनरूपेण प्रतिपादितं तच्च सात्त्विकभावस्यापि तत्र स्वीकारकरणमिति ।

एवं प्रकारेण श्रीधनञ्जयः पूर्वाचार्याश्च रसस्वरूपं प्रतिपादितवन्तः ।

सन्धिमर्म

नाट्यशास्त्रिणः "सम्मेलनम्" इति सन्धिशब्दस्य अर्थं कुर्वन्ति । बीज-बिन्दु-पताका-प्रकरी-कार्याणां पञ्चार्थप्रकृतीनां क्रमशः आरम्भ-यत्न-प्राप्त्याशा-नियताप्तिफलागमरूपाभिः पञ्च अवस्थाभिः सह एकैकशः सम्मेलनं जायते तदेव सन्धिनाम्ना ज्ञायते ।

"एतस्माद् सन्धयोऽपि पञ्च भवन्ति

(१) मुखसन्धिः (२) प्रतिमुखसन्धिः

(३) गर्भसन्धिः (४) विमर्शसन्धिः

(५) उपसंहृतिसन्धिः ।

दशरूपके च कथितम् –

अर्थप्रकृतयः पञ्च पञ्चसन्धिसमन्विताः ।
यथासंख्येन जायन्ते मुखाद्याः पञ्च सन्धयः ॥

(१)अत्र एवं संयोगः वर्तते यथा आरम्भावस्थायुक्ता बीजप्रकृतिः मुखसन्धिः।

(२) प्रयत्नावस्थया सहिता बिन्दुप्रकृतिः प्रतिमुखसन्धिः ।

(३)नियताप्त्याशायुक्ता पताका गर्भसन्धिः ।

(४)नियताप्त्या संयुक्ता प्रकरी विमर्शसन्धिः ।

(५)तथा फलावाप्त्यवस्थया समन्विता कार्यप्रकृतिः उपसंहृतिसन्धिः भवति। सन्धिलक्षणं दृढतया बोधयितुं रूपककारः कथयति यत्–

एकेन हेतुना अन्वितानां कथांशानाम् अवान्तरैकप्रयोजनसम्बन्धः सन्धिः ।

तेन कथितञ्च–

"अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति"

अस्यार्थस्तु केनचिदेकेन प्रयोजनेन परस्परं सम्बन्धानां कथांशानां यदा केनचित् प्रयोजनान्तरेण सम्बन्धः प्रतिपाद्यते तदा सः सम्बन्धः सन्धिः इति कथ्यते।

पञ्चसन्धयः

मुखम् –

पञ्चसन्धिषु प्रप्रथमः सन्धिरस्ति मुखसन्धिः। तस्य किं लक्षणं ? इति प्रश्ने उत्तरं लक्षयति श्रीधनञ्जयः

"मुखं बीजसमुत्पत्तिः नानार्थरससम्भवा"

अस्या अर्थः फलति यद् यत्र रूपकबीजस्य सूचना भवति येन च नाना रसा उत्पन्नाः भवन्ति सः मुखसन्धिः ।

अंङ्गानि –

अस्य मुखसन्धेः बीजारम्भस्य समन्वयाद् द्वादश अङ्गानि भवन्ति । दशरूपके निरूपितञ्च

"अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात्"

तानि च अङ्गानि यथा

(१) वस्तुबीजस्थापकः उपक्षेपः (२) बीजन्यासबहुलः परिकरः

(३)परिकरनिष्पादकः परिन्यासः (४)फलवस्तुगुणज्ञापकं विलोभनम्

(५)अर्थसमर्थिका युक्तिः (६)सुखानुभूतिजननी प्राप्तिः

(७) बीजागमनं समाधानः (८)सुखदःखात्मकं विधानम्

(९) अद्भुतावेशः परिभावः (१०) गूढभेदनम् उद्भेदः

(११)प्रकृतारम्भः करणम् (१२)प्रोत्साहना भेदः

प्रतिमुखसन्धिः

द्वितीयः सन्धिरस्ति प्रतिमुखसन्धिः । अस्यार्थज्ञानम् एवं भवति यत्र बीजस्य कश्चिद् अंशः लक्ष्यः भवति कश्चिच्च अलक्ष्यः भवति अनेन प्रकारेण लक्ष्यालक्ष्यतया उद्भेदनं सः प्रतिमुखसन्धिविषयः। यथा अङ्कुरणसमये बीजाङ्कुरः कश्चित् लक्ष्यः दृश्यः भवति कश्चित् अलक्ष्यः भूतः उद्भिन्नो भवति।

तथैव रूपके वस्तुबीजं भवति तत्र प्रतिमुखसन्धिः इति । श्रीधनञ्जयोऽपि दशरूपके इदमेव कथयन्नाह

"लक्ष्यालक्ष्यतयोद्भेदः तस्य प्रतिमुखं भवेत्"।

अङ्गानि (भेदाः)

प्रतिमुखसन्धेः त्रयोदशभेदाः भवन्ति यथा –

(१)रतिविषयकेच्छा विलासः (२) नष्टबीजान्वेषणं परिसर्पः

(३) अरतिः विधूतम् (४) उपशमो शमः

(५) परिहासवचो नर्म (६) परिहासद्युतिः नर्मद्युतिः

(७) उत्तरावाक् प्रगमनम् (८) हितरोधः निरोधः

(९) पर्युपास्तिः पर्युपासनम् (१०) विशेषवद्वाक्यं पुष्पम्

(११) सोपायं तु उपन्यासः (१२) प्रत्यक्षनिष्ठुरं वज्रम्

(१३) चातुवर्ण्योपगमनं वर्णसिंहारः

इत्थं प्रतिमुखसन्धिः साङ्गः प्रतिपादितः वर्ततेऽत्र ।

गर्भसन्धिः

नाट्याचार्याः यत्र बीजं दृश्यते पुनः तन्नष्टं भवति तदा तस्य अनेकप्रकारैः अन्वेषणं

पुनः पुनः प्राप्तिः भूयोभूयः वियोगः तत्र गर्भसन्धिः भवतीति मन्यन्ते । श्रीधनञ्जयोऽपि इदमेव लक्षयति यथा –

"गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः"

यथा रत्नावल्यां वत्सराजस्य उदयनस्य वासदत्तायाः प्राप्तिः, विच्छेदः वारंवारं भवति अतः तत्र गर्भसन्धिः वर्तते ।

अङ्गानि

अस्य गर्भसन्धेः द्वादश अङ्गानि भवन्ति यथा –

१ छद्म अभूताहरणम्
२ तत्त्वार्यकीर्तनं मार्गः
३ वितर्कवद् वाक्यं रुपम्
४ सोत्कर्षं स्यात् उदाहृतिः
५ सञ्चिन्त्यमानाप्तिः क्रमः
६ सामदानोक्तिः संग्रहः
७ अभ्यूहो लिङ्गतोऽनुमानम्
८ अभिसन्धिः अधिवलम्
९ संरब्धं वचः तोटकम्
१० अरिकृता भीतिः उद्वेगः
११ शङ्कात्रासौ च सम्भ्रमः १२ गर्भबीजसमुद्भेदाद् अक्षेपः ।

एवं गर्भसन्धिरिह साङ्गः चर्चितः वर्तते ।

विमर्शसन्धिः

चतुर्थः विमर्शसन्धिः विचार्यते । यत्र क्रोधेन , व्यसनेन विलोभनेन वा फलप्राप्तौ विचारः क्रियते तथा गर्भसन्ध्या बीजं प्रकटितं स्यात् तत्र विमर्शसन्धिः भवति । रूपककारः विमर्शसन्धिलक्षणं निरूपयन्वदति यथा –

क्रोधेनावमृशेद्यत्र व्यसनाद्वा विलोभनात् ।
गर्भनिर्भिन्नबीजार्थः सोऽवमर्श इति स्मृतः ॥

अङ्गानि

अस्य सन्धेरपि त्रयोदश अङ्गानि भवन्ति । यथा –

१ दोषप्रख्या अपवादः
२ रोषभाषणं सम्फेटः

प्राप्तये शीघ्रं यः उपायः चेष्टाविशेषः वा क्रियते स एव यत्न इति कथ्यते। उक्तं च दशरूपके

"प्रयत्नस्तु तदप्राप्तौ व्यापारोऽतितरान्वितः"

उदाहरणन्तु रत्नावल्यां दृश्यते यथा सागरिका वत्सराजम् इच्छति, तस्य च प्राप्तये चित्रलेखनं प्रस्तुतं करोति अत्र तस्याः उदयनरूपफलस्य प्राप्तये प्रयत्नः स्पष्टं दृश्यते।

प्राप्त्याशा

प्राप्तेः आशा इति प्राप्त्याशा कार्यं निर्विघ्नं पूर्णं स्यान्न वा ? अतः फलस्य सम्भावना विघ्ननिर्विघ्नाभ्यां चलायमाना यत्र भवति सा प्राप्त्याशा नाम्नी नाट्यावस्था। कथितञ्च दशरूपके

"उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसंभवः"

उदाहरणन्तु रत्नावल्याः तृतीयाङ्के सागरिका उदयनेन सह वर्तते तथापि "यदि वासवदत्ता नृपं नयेत् तदा समागमः भविष्यति" इति विदूषकस्य कथनेन विघ्नशङ्कया समागमप्राप्तौ एकान्तिकनिश्चयस्य अभावः दृश्यते अतोऽत्र प्राप्त्याशा नामिका नाट्यावस्था वर्तते इति सिद्धं भवति।

नियताप्तिः

नियता निश्चिता आप्तिः प्राप्तिः यस्यां सा नियताप्तिः। यत्र विघ्नानां रहितता भवति तेन च फलस्य लब्धिः निश्चिता तत्र नियताप्तिनाम्नी नाट्यस्य चतुर्थी अवस्था भवति। नियताप्तेश्च लक्षणं निरूपितम्।

"अपायाभावतः प्राप्तिः नियताप्तिः शुनिश्चिता"

नायकः प्राप्त्याशायां सन्दिहानः भवति परमत्र नायकः फलप्राप्तिः भविष्यत्येव निश्चिन्तो भवति।

उदाहरणन्तु रत्नावल्याम्

द्वीपादन्यस्मादपि..।

फलागमः

अवान्तरफलप्राप्त्या सह अन्तिमफलप्राप्तिः फलागमः कथ्यते इयं हि अन्तिमावस्था। अस्याञ्च अन्तिमफलप्राप्तिः भवति। यथा रत्नावल्यां उदायनस्य सागरिकया सह विवाहेन चक्रवर्ति..।

अर्थोपक्षेपकचिन्तनम्

कविभिः रूपके यत् कथावस्तुनः प्रयोगः क्रियते तत् कथावस्तु सामान्यरूपेण द्विप्रकारकं भवति

(१) सूच्यम् (२) दृश्यश्रव्यम्।

द्वेधा विभागः कर्तव्यः सर्वस्यापीह वस्तुनः।
सूच्यमेव भवेत्किञ्चित् दृश्यश्रव्ययथापरम् ॥

तत्र सूच्यस्य वस्तुनः सूचकाः अर्थोपेक्षकाः भवन्ति यथा अर्थस्य वस्तुनः उपक्षेपकाः सूचका इति। ते अर्थोपक्षेपकाः पञ्च भवन्ति यथा –

(१) विष्कम्भकः (२) चूलिका
(३) अङ्कास्यम् (४) अङ्कावतारः
(५) प्रवेशकः इति।

उक्तञ्च–

अर्थोपक्षेपकैः सूच्यं पञ्चभिः प्रतिपादयेत्।
विष्कम्भश्चूलिकाङ्कास्याङ्कावतारप्रवेशकैः ॥

विष्कम्भकः

रूपके जातानां भविष्ये जायमानानाञ्च घटनानां, यासां प्रदर्शनं रङ्गमञ्चे कर्तुं न शक्यते तासां सूचकं, अथवा अङ्कस्थवर्णितकथायाः अन्येन अन्याभ्यां वा प्रयोजितं संक्षिप्तं तत्त्वं विष्कम्भकः कथ्यते।

दशरूपके च चर्चितं यथा –

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।

संक्षेपार्थस्तु विष्कम्भः मध्यपात्रप्रयोजितः ॥

अस्य उदाहरणन्तु उत्तररामचरितस्य तृतीयेऽङ्के । अस्य अङ्कस्य प्रारम्भे तमसामुखेति नदीद्वयसम्वादे स्पष्टं प्रतीयते।

अयं विष्कम्भकः शुद्धसङ्कीर्णभेदेन द्विविधः भवति।

शुद्धः

यत्र एकं मध्यमपात्रं वा पात्रद्वयं कथां सूचयति तत्र शुद्धः विष्कम्भकः भवति। यथा – **"एकानेककृतः शुद्धः"** इति। अत्र संस्कृतभाषा भवति।

सङ्कीर्णः

यत्र नीचकोटिकं पात्रं अपरञ्च मध्यमपात्रं भवतः, कथायां प्रयोजितः सङ्कीर्णविष्कम्भः कथ्यते।

चूलिका

यत्र नेपथ्ये नाम वेषरचनाभवने स्थितपात्राणि सूच्यकथावस्तुनः सूचनां यच्छन्ति तत्र 'चूलिका' नामकोऽर्थो पक्षेपकः भवति। उक्तञ्च दशरूपके

"अन्तर्जवनिकासंस्थैः चूलिकार्थस्य सूचना"

उदाहरणम्–

यथा वीरचरितस्य चतुर्थाङ्कस्य प्रारम्भे "रामेण परशुरामः जितः" इत्यस्य सूचनाम् प्रयच्छति तत्र "चूलिका" नामार्थोपक्षेपकः वर्तते ।

अङ्कास्यम्

यत्र अङ्कस्य समाप्तौ तस्मिन्नङ्कान्ते प्रयुक्तपात्रैः परित्यक्तस्य कस्यचिद् अर्थविशेषस्य सूचना भवति तत्र 'अङ्कास्यम्' नामकोऽर्थोपक्षेपकः भवति । दशरूपके कथितञ्च–

"अङ्कान्तपात्रैरङ्कास्यं छिन्नाङ्कस्यार्थसूचनात्"

उदाहरणम्

यथा महावीरचरिते द्वितीयाङ्कस्य अन्ते "सुमन्तः भगवन्तौ वशिष्ठविश्वामित्रौ

भवतः सभार्गवानावाहयतः" । इतरे क्कभगवन्तौ....। इतरे अनुरोधात्तत्रैव गच्छामः । इत्यत्र एव अङ्क...... इति अङ्कान्तपात्रैः प्रयोगः कृतः तस्माच्च उत्तराङ्ककथावस्तुनः सूचनात् अङ्कास्यम्।

अङ्कावतारः

यत्र प्रथमाङ्कस्य विभाजनेन विनैव तस्य अङ्कस्य अङ्गरूपेण द्वितीयाङ्कस्य कथावस्तुनः संघटनं भवति तत्र अङ्कावतारनामकः अर्थोपक्षेपकः भवति।

उदाहरणम्

यथा अभिज्ञानशाकुन्तले पञ्चमाङ्कस्य अन्ते धीवरस्य वृत्तान्तम् इति।

प्रवेशकः

नीचपात्रेण नीचपात्राभ्यां वा प्रयुक्तः मागधी-शकर्यादिनीचकोटिकप्राकृतभाषासमन्वितः, द्वयोः अङ्कयोः मध्ये स्थितः प्रवेशकः भवति। श्रीधनञ्जयः लक्षणं कथयति दशरूपके यथा –

तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः ।
प्रवेशोऽङ्कद्वयस्यान्तः शेषार्थस्योपसूचकः ॥

उदाहरणम्

यथा वेणीसंहारनाटकस्य प्रथमाङ्कस्य अन्ते द्वितीयाङ्कस्य प्रारम्भे च राक्षसराक्षसीवार्तालापे।

दशरूपककार आचार्यधनञ्जयः एवं प्रकारेण अर्थोपक्षेपकनिरूपणं कृतवानस्ति।

वृत्तिविचारः

वृत्तिशब्दस्य अर्थः भवति व्यवहारः स्वभावः वा । अपि च नायकस्य यः व्यवहारः स्वभावो वा तं कस्मिंश्चित् हेतुविशेषे प्रेरयति सा वृत्तिः कथ्यते । एतस्मादेव अवलोके उक्तम्

"प्रवृत्तिरूपो नेतृव्यापारस्वभावो वृत्तिः"

यदि वयं नेतुः व्यापारस्य वर्गीकरणं कुर्मः तर्हिः चतुर्विधाः व्यापाराः दृश्यन्ते

तस्मात् वृत्तिरपि चतुर्धा विभक्ताऽस्ति ।

"तद्व्यापारात्मिका वृत्तिश्चतुर्धा"

इति दशरूपकवचनं चात्र प्रमाणम् । ताश्च

(१) कैशिकी (२) सात्त्वती

(३) आरभटी (४) भारती

कैशिकी

यत्र गीतनृत्यविलासाद्यैः श्रृङ्गारमयचेष्टाभिः कोमला प्रवृत्तिः भवति तत्र कैशिकीवृत्तिः भवति । उक्तञ्च–

———— तत्र कैशिकी ।

गीतनृत्यविलासाद्यैः मृदुः श्रृङ्गारचेष्टितैः ॥

अङ्गानि

अस्याः चत्वारि अङ्गानि भवन्ति यथा –

१ नर्म २ नर्मस्फिञ्जः ३ नर्मस्फोटः ४ नर्मगर्भः

(१) नर्म

येन व्यापारेण नायकेन नायिकायाः वा नायिकया नायकस्य चित्तं प्रसन्नं क्रियते सः विलासपूर्णः व्यापारः नर्म कथ्यते । इदं अष्टादशप्रकारकं भवति ।

(२) नर्मस्फिञ्जः

यत्र नायकनायिकयोः प्रथमसमागमे पूर्वं तु हर्षः भवति किन्तु पश्चात् कोऽपि दृष्टवान् स्यात् ? इति भयं जायते तत्र नर्मस्फिञ्जः भवति ।

(३) नर्मस्फोटः

यत्र सात्त्विकादिभिर्भावैः ईषद्मात्रमपि रसः सूचितो भवति तत्र नर्मस्फोटः इति ।

(४) नर्मगर्भः

यत्र नायकः किमपि प्रयोजनं साधयितुं गुप्तरुपेण प्रविशति तत्र नर्मगर्भः

भवति।

उदाहरानि मूलग्रन्थे दृष्टव्यानि ।

सात्त्वती

यत्र नायकस्य व्यापारः शोकरहितो भवति च तस्मिन् व्यापारे सत्त्वम्, शौर्यम्, त्यागः, दया, कोमलता, हर्षादयो भावाः भवन्ति तत्र इयं सात्त्वती वृत्तिः भवति ।

"विशोला सात्त्वती सत्त्वशौर्यत्यागदयार्जवैः" इति वचनात् ।

अङ्गानि

अस्या अपि चत्वार्यङ्गानि भवन्ति ।

(१)संलापकः (२) उत्थापकः (३) साङ्घात्यः (४) परिवर्तकः

(१) संलापकः

यत्र अनेकभावैः रसैश्च सहिता गम्भीरा अस्ति । तत्र संलापकः भवति ।

(२) उत्थापकः

यत्र एकं पात्रं अन्यद् पात्रं युद्धार्थम् उत्थापयति तत्र उत्थापकः भवति ।

(३) साङ्घात्यः

यत्र मन्त्र-अर्थ-दैवशक्तिभिः शत्रूणां प्रतिनायकानां सङ्घस्य भेदनं भवति तत्र साङ्घात्यः ।

(४) परिवर्तकः

यत्र प्रारब्धं कार्यं त्यक्त्वा अन्यस्य कार्यस्य प्रारम्भः भवति तत्र परिवर्तकः ।

उदाहरणार्थं ग्रन्थे पश्यन्तु ।

(३) आरभटी

यत्र माया, इन्द्रजालं, सङ्ग्रामः, क्रोधः उद्भ्रान्तता इत्याद्याः चेष्टाः भवन्ति तत्र आरभटी वृत्तिः भवति ।

———— आरभटी पुनः ।

मायेन्द्रजालसंग्राम क्रोधोद्भ्रान्तादिचेष्टितैः ॥

इति दशरुपकारिकायाः प्रमाणम् ।

अङ्गानि

आरभट्या अपि चत्वारि अङ्गानि भवन्ति । यथा

(१) संक्षिप्तिकः (२) सम्फेटः (३) वस्तूत्थापनम् (४) अवपातः ।

(१) संक्षिप्तिकः

यत्र नाटककारः नाट्यरचनाशिल्पकौशल्येन कथावस्तुनः संक्षिप्तरूपेण रचनां करोति तत्र संक्षिप्तिकः ।

(२) सम्फेटः

यत्र क्रुद्धं पात्रद्वयं परस्परम् आरोपप्रत्यारोपं करोति तत्र सम्फेटः ।

(३) वस्तूत्थापनम्

यत्र मन्त्रबलेन मायया वा वस्तुनः उत्थापना भवति तत्र वस्तूत्थापनम् ।

(४) अवपातः

यस्मन् कस्मिन् अपि पात्रे रङ्गमञ्चे प्रविष्टे पुनः तस्य निर्गमने अन्यपात्रेषु त्रासः स्यात्तदा अवपातः भवति ।

(-४) भारती

नाटके भारतीवृत्तेराश्रयः अवश्यमेव कर्तव्यः । नाटके नटः मधुरैः पद्यैः रङ्गमञ्चं प्रस्तद्य ऋतुवर्णनमुखेन भारतीवृत्तिं स्वीकरोती । उक्तञ्च

"भारतीसंस्कृतप्रायो वाग्व्यापारो नटाश्रयः"

अङ्गानि

भारत्याः चत्वार्यङ्गानि जायन्ते

(१) प्ररोचना (२) वीथी (३) प्रहसनम् (४) आमुखम् ।

(१) प्ररोचना

काव्यार्थादिकस्य प्रशंसाद्वारा काव्यार्थम्प्रति सामाजिकानां प्रवृत्तिकरणं प्ररोचना

कथ्यते । यथा

श्रीहर्षः निपुणो........................ ।

(२) वीथी

यत्र अपरिपाकात् श्रृङ्गारो रसः सूच्यः भवति च अन्येषामपि रसानाम् ईषद्समावेशः तत्र वीथी ज्ञेया ।

(३) प्रहसनम्

हास्यपूर्णवचनैः सहितं पाखण्डिविप्रचेटीविटैः आकुलं तच्चरितं वेषभाषादिभिः युक्तं प्रहसनं भवति ।

(४) आमुखम्

यत्र सूत्रधारः नटी वा मार्षं वा विदूषकं विचित्रोक्त्या प्रस्तुतस्य आक्षेपं कृत्वा स्वकार्यस्यवर्णनं करोति तदामुखम् । इदं प्रस्तावना नाम्नापि उच्यते । आमुखमिदं पुनः कयोद्धात-प्रवृत्तक-प्रयोगातिशयभेदेन त्रिधा भवति । एतेषां लक्षणोदाहरणादिकं मूलग्रन्थे दृष्टव्यम्।

इत्थं वृत्तिचतुष्टयसारः निरुपितो मयाऽत्र।

योषिदलङ्कारा:

यदा नायिका यौवनारूढा भवति तदा अवश्यम्भवाः सात्त्विकभावाः मनोविकाररूपाः समायान्ति अतः तस्याः सौन्दर्यं द्विगुणितं वर्द्धते यथा स्वर्णाभूषणानां धारणेन शोभायाम् अभिवृद्धिः भवति । अत एव शोभासंवर्द्धनरूपसामान्यधर्मस्य समानत्वात् तेऽपि भावाः (विकाराः) अलङ्काराः कथ्यन्ते । हारादयस्तु पृथग्वर्तमानाः कृत्रिमाश्च भवन्ति, किन्तु सत्त्वस्य उद्भेदाज्जायमानाः तेऽलङ्काराः शरीरे वर्तमानाः अकृत्रिमाः स्वाभाविकाश्च भवन्ति। कथितञ्च-

"यौवने सत्त्वजाः स्त्रीणामलङ्कारास्तु विंशतिः"

अनेन दशरूपकस्य वचनेन सिद्धं भवति यत् सत्त्वोत्पन्ना अलङ्काराः

विंशतिसंख्याकाः भवन्ति ।

सामान्यरूपेण एतेषां योषितां सात्त्विकालङ्काराणां (भावानां) वर्गीकरणं त्रिप्रकारेण कर्तुं शक्यते ।

(१) शरीरजाः (भावाः) अलङ्काराः ।

(२) अयत्नजाः (भावाः) अलङ्काराः ।

(३) स्वभावजाः (भावाः) अलङ्काराः ।

शरीरजाः (भावाः) अलङ्काराः ।

शरीरे जाता शरीरजाः अनया व्युत्पत्त्या एवं अलङ्काराः बाह्याः भवन्ति । युवावस्थायां सत्त्वस्य उद्रेकाद् जायमानैः मनोविकारैः नायिकायाः शोभावर्द्धकेषु अलङ्कारेषु केचन शरीरजाः भवन्ति । शरीरजा अलङ्काराः सन्ति

(१)भावः (२) हावः (३) हेला च

अयत्नजाः (भावाः) अलङ्काराः ।

युवावस्थायां सत्त्वस्य उद्रेकाद् नायिकायाः प्रयत्नं विना एव ये भावाः भवन्ति तेऽयत्नजा अलङ्कारा इत्युच्यन्ते । स्वाभाविका इत्यर्थः फलति । एते सप्त सन्ति यथा–

(१) शोभा (२) कान्तिः (३) दीप्तिः (४) माधुर्यम्

(५) प्रगल्भता (६) औदार्यम् (७) धैर्यम् ।

स्वभावजाः (भावाः) अलङ्काराः ।

युवावस्थायां ये भावाः स्वभावत एव भवन्ति ते स्वभावजा अलङ्काराः स्त्रीणां भवन्ति । एते हि दश सन्ति । यथा –

(१) लीला (२) विलासः (३) विच्छित्तिः

(४) विभ्रमः (५) किलकिञ्चनम् (६) गोट्टायितम्

(७) कुट्टमितम् (८) विव्वोकः (९) ललितम्

(१०) विहृतम् ।

एतेषां त्रयाणां सङ्कलनेन

शरीरजाः त्रयः, अयत्नजाः सप्त, स्वभावजाः दश, विंशतिर्भावाः अलङ्काराः भवन्ति योषितामिति प्रतिपादितं भवति।

धीरादिनायकस्वरूपपरामर्शः

प्रथमं नायकस्य चत्वारः भेदाः भवन्ति। यथा –

(१) धीरललितः (२) धीरशान्तः (३) धीरोदात्तः (४) धीरोद्धतः इति। तत्र प्रत्येकेषां सलक्षणनिरूपणमत्र प्रस्तुयते।

(१) धीरललितः

धीरललिनायकस्य लक्षणं दशरुपके प्रतिपादितं यथा –

"निश्चिन्तो धीरललितः कलासस्तः सुखी मृदुः"

अस्मिन्नायके निश्चिन्तता, धैर्यं, लालित्यं, कलाप्रियतासस्तता च कोमलता सुखेच्छा च भवन्ति इति लक्षणेनाने स्पष्टं प्रतीतं भवति।

यः नायकः सचिवादिषु राज्यस्य भारं समर्प्य निश्चिन्तः

सङ्गीतादिकलासंलग्नः, भोगविलाधीरललितः नायकः भवति।

उदाहरणम् –

स्वप्नवासनदत्तनाटके वत्सराजः उदयनः–

"राज्यं निर्जितशत्रु.......................... ।"

अत्र वत्सराज उदयनः अत्यन्तं निश्चिनाः श्रृङ्गारप्रधानः, कामदेवोत्सवाय प्रयत्नशीलः वर्तते तस्माद् धीरललितः नायकोऽस्ति।

(२) धीरशान्तः

नायकेषु द्वितीयोऽस्ति धीरशान्तः तस्य लक्षणं दशरूपके यथा –

"सामान्यगुणयुक्तस्तु धीरशान्तो द्विजादिकः"

धीरशान्तनायकः नायकसामान्यादिगुणैः युक्तः जात्या विप्रः वणिक् सचिवो वो भवति।

उदाहरणम्

यथा मृच्छकटिके चारुदत्तः, मालतीमाधवे माधवस्य

"मखशतपरिपूतं .... ।"

इत्यत्र चारुदत्तः स्वयमेव स्वपरिचयं ददाति अनेन सः धीरशान्तः नायकः सिद्धो भवति ।

(३) धीरोदात्तः

तृतीयः नायकभेदोऽस्ति धीरोदात्तः अस्य लक्षणं दशरुपके प्रतिपादितं यथा –

"महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः ।
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः ॥"

अयं शोकक्रोधाद्यैः अनभिभूतः, अत्यन्तं गभीरः, क्षमाशीलः, आत्म-श्लाघारहितः, स्थिरबुद्धिः,मिथ्याभि मानशून्यः,स्वीकृतकार्यनिर्वाहकः भवति ।

उदाहरणम्

यथा अभिज्ञानशाकुन्तले दुष्यन्तः । कः पौरवे वसुमतीं ....। दुष्टशासकः, देवेन्द्रस्य सहायको इत्यादिभिः धीरोदात्तः नायकः दुष्यन्तः वर्तते ।

(४) धीरोद्धतः

चतुर्थो हि नायकः वर्तते धीरोद्धतः तस्य लक्षणं दशरूपके यथा-

दर्पमात्सर्यभूयिष्ठो मायाछद्मपरायणः ।
धीरोद्धतस्त्वहंकारी चलश्चण्डो विकत्थनः॥

यः दर्प-इर्ष्याभावनया परिपूर्णग्रस्तहृदयः,मायाचरणे कपटव्यवहारपरायणः,अहंकारी,चञ्चलस्वभावः, क्रोधी,आत्मप्रशंसकः सः धीरोद्धतः नायकः कथ्यते ।

उदाहरणम्

यथा वेणीसंहारे भीमसेनः धीरोद्धतः नायकः वर्तते ।

स उद्घोषयति-

मथ्नामि कौरवशतं समरे न कोपात् ....।

अत्र भीमः सन्धिवार्तया कुपितः कौरवान् मथितुं, दुःशासनस्य रुधिरं पातुं, दुर्योधनस्य उरुभङ्गं कर्तुं च स्वसामर्थ्यं स्वयं प्रकटयति । तस्मादत्र लक्षणस्य सङ्गतिः भवति ।

चत्वारो नायकानां तु भेदाः व्यासेन कीर्तिताः ।
दशरूपानुसारं हि धनञ्जयमताः मया ॥

वस्तुस्वरूपभेदाः

दशरूपकाणां परस्परं भेदः भवति तत्र प्रमुखं भेदकं तत्त्वमस्ति वस्तु (कथावस्तु) । कविः काल्पनिकम् ऐतिहासिकं वा वस्तु गृहीत्वा तत्र रसादीन् संस्थाप्य दृश्यश्रव्यात्मककाव्यरूपेण सहृदयानां समक्षम् उपस्थापयति । काव्ये कथानकरूपेण प्रयुज्यमानं वस्तु द्विप्रकारकं वर्तते ।

(१) आधिकारिकम्   (२) प्रासङ्गिकञ्च ।

तत्र आधिकारिकं वस्तु प्रधानमस्ति प्रासङ्गिकं तु अङ्गमिति । उक्तञ्च दशरूपके

"तत्राधिकारिकं मुख्यम् अङ्गं प्रासङ्गिकं विदुः ।"

(१) आधिकारिकम्

अधिकारिणा निर्वृत्तमाधिकारिकमिति व्युत्पत्त्या नाटकादिषु मुख्यरूपेण प्रयुज्यमानं कथानकम् आधिकारिकं कथ्यते । यथा रामायणे सीतारामयोश्चरितम् ।

तत्र प्रश्नः समुदेति कोऽयमधिकारी ? तत्र उच्यते –

अधिकारः फलस्वाम्यम् अधिकारी च तत्प्रभुः ।
तन्निर्वृत्तमभिव्यापि वृत्तं स्यादाधिकारिकम् ॥"

रूपके नायकः फलं प्राप्तुमेव सर्वं करोति, कार्यान्ते च यदाप्नोति तत्फलं, तस्मात् नायकः तस्य अधिकारी । यथा रामायणे रामः यद्यत् करोति तस्य तस्य कार्यस्य फलं वर्तते राक्षसवधः, सीताप्राप्तिः वा रामराज्यमिति । एतेषां फलानां प्राप्तिः रामायैव भवतीति रामः

अस्याधिकारी । अतः रामं केन्द्ररूपेण मत्वा यस्य कथानकस्य विस्तारो भवति तद् अधिकारिकं वस्तु अस्ति।

(२) प्रासङ्गिकम्

प्रसङ्गाद् आगतं प्रासाङ्गिकमिति व्युत्पत्या फलप्राप्तौ साहाय्यकविधायकं वस्तु प्रासङ्गिकं वर्तते ।

कथितञ्च "**अङ्गं प्रासङ्गिकं विदुः**" ।

एतस्यापि प्रासङ्गिकवृत्तस्य किमपि फलं जायते यथा सुग्रीववृत्तान्तस्य वालिवधः, राज्यप्राप्तिः वा ।

पुनरिदं प्रासङ्गिकं वस्तु द्विप्रकारकं भवति ।

(१) पताका (२) प्रकरी

(१) पताका

दशरूपके "सानुबन्धं पताकाख्यम्" इत्युक्तत्वात् यद् वस्तु साभिप्रायम्, किमपि विशिष्टमुद्देश्यं गृहीत्वा प्रचरति तत् पताकाख्यं वस्तु कथ्यते।

यथा रामायणे सुग्रीवविभीषणोः वृत्तान्तं दूरं यावत् प्रचरति। यथा पताका-ध्वजा नायकविजयस्य सूचिका तथैव आधिकारिकं वृत्तं मुख्यं नायकञ्च यत् पोषयति तदपि पताका वस्तु।

(२) प्रकरी

"प्रकरी च प्रदेशभाक्" यथा खण्डकाव्यं एकं वृत्तं द्योतयति तथैव कथाङ्गस्य एकदेशानुसारिणी प्रकरी भवति। यथा रामायणे शबरीकथावृत्तान्तम्।

खलनायकलक्षणगुणाः

यथा चलचित्रे वयं पश्यामः एकः नायकः भवति अन्य एकः प्रतिनायकः खलनायको वा भवति । तस्य कार्यञ्च नायकमार्गे विघ्नजननम् । तथैव नाट्ये नाटकीयकथावस्तुनः फलस्य नायिकायाः वा प्राप्तये निरन्तरं प्रयत्नशीलस्य नाटकस्य मार्गे

यः सर्वथा विघ्नान् जनयति तेन सह शत्रुत्वञ्च आचरति स खलनायकः कथ्यते।

तस्मादुक्तम्

"लुब्धो धीरोद्धतः स्तब्धः पापकृद्व्यसनी रिपुः"

अत्र कारिकायां "रिपुः" इति पदेन प्रतिनायकस्य बोधः भवति तस्य लक्षणान्यत्र प्रस्तुतानि सन्ति।

खलनायकोऽयं स्वस्य स्वभावेन लुब्धः धीरोद्धतः, स्तब्धः, पापकर्ता, व्यसनी च भवति । तत्र लोभपरायणः लुब्धः "धीरोद्धतस्त्वहङ्कारीचलश्चण्डो विकत्थनः" इति लक्षणयुक्तः धीरोद्धतः, किं कर्तव्यमूढः, पापकर्मपरायणत्वात् पापकर्ता, दुराचरणसंसर्गत्वात् व्यसनीति कथ्यते।

उदाहरणम्

यथा वेणी संहारे दुर्योधनः, शिशुपालवधे शिशुपालः, इत्याद्युदहरणानि सन्ति।

नायिकाभेदवर्णनम्

नायकसामान्यस्य यानि लक्षणानि तान्मेव नायिकायाः लक्षणानि भवन्ति यथा

"नेत्री विनीता मधुरा त्यागिनी कुशला तथा ।
प्रियंवदा ....॥"

सर्वासु नायिकासु सामान्यगुणाः प्रायः समानाः भवन्ति तथापि स्वस्वभाववशात् नायिकाप्यनेकप्रकारा भवति तथापि विभागत्रये इयं विभस्ता दशरूपककारेण धनञ्जयेन।

(१) स्वकीया (२) परकीया (३) साधारणा

नाम्ना एव स्पष्टं प्रतीतं भवति यथाशास्त्रं विवाहिता स्वकीया। या केनचिद् अन्येन विवाहिता स्त्री, अविवाहिता कन्या वा स्वानुरक्ता सा परकीया भवति। या सर्वजनगम्या सा साधरणा स्त्री कथ्यते।

उदाहरणानि

(१) तत्र स्वीया यथा उत्तररामचरिते सीतामाता ।

(२) अन्या अभिज्ञानशाकुन्तले शकुन्तला ।

(३) सामान्या च मृच्छकटिके वसन्तसेना वर्तते ।

स्वीयाबोधः

त्रिविधा या नायिका तत्र प्रथमा स्वीया वर्तते । तस्याः लक्षणञ्च

"स्वीया शीलार्जवादियुक्" इत्यादि

अत्र शीलपदस्यार्थः सदाचरणम्, आर्जवपदस्यार्थ अकुटिलता, पातिव्रत्यम् उक्तम् आदिपदेन च लज्जादीनां ग्रहणं भवति ।

भेदाः

स्वीयेयं नायिका स्वगुणानुरूपैः त्रिविधा भवति ।

(१) मुग्धा (२) मध्या (३) प्रगल्भा ।

(१) मुग्धा

नायिका यौवनस्य कामभावस्य च प्रारम्भावस्थायां भवति, च रतिकार्ये भीता, मृदुक्रोधशीला सा मुग्धा नायिका कथ्यते । अस्याश्च वयोमुग्धा, काममुग्धा, रतवामा, मृदुक्रोधा इत्याद्या अवस्था भवन्ति ।

आसाञ्चोदाहरणानि स्वयं यत्र तत्र ग्रन्थेषु द्रष्टव्यानि ।

(२) मध्या

या नायिका प्राप्तपूर्णयौवनावस्था लब्धपूर्णकामभावना च भवति तथा मोहान्तं यावत् सुरतक्षमा भवति सा मध्या कथ्यते । इयं च मध्या कथ्यते । इयं च मध्या पूर्णयौवना, पूर्णकामवती, मोहान्तसुरतक्षमा इति सामान्येन त्रिप्रकारा भवति ।

पुनरियं मध्या मनोविकारानुरूपाभिः तिसृभिः अवस्थाभिः त्रिप्रकारा भवति ।

(१) धीरा (२) अधीरा (३) धीराधीरा ।

ज्येष्ठाकनिष्ठाभेदेन पुनरपि मध्यमाया द्वौ भेदौ इति षड्विधा मध्या भवति ।

(३) प्रगल्भा

यौवनान्धा स्मरोन्मत्ता प्रगल्भा दयिताङ्गके ।
विलीयमानेवानन्दाद्रतारम्भेऽप्यचेतना ॥

आस्यार्थस्तु या यौवनप्रवाहेन अन्धा, स्मरवेगेन मत्ता, सर्वावस्थासु धृष्टा, लज्जारहिता, तथा सुरतकाले प्रियस्य अङ्गानि तथा समाश्रयति, दृढं च समालिङ्गति यथा तत्रैव विलीना च सुरतस्य प्रारम्भे एव अत्यधिकानन्दानुभूत्या चेतनाशून्या इव भवति सा प्रगल्भा प्रौढा वा नायिका कथ्यते।

इयं हि संक्षेपेण गाढयौवना, भावप्रगल्भा, सुरतप्रगल्भा, लज्जाविहीना इत्याद्यनेकप्रकारा दृश्यते।

इयं हि धीरा-अधीरा-धीराधीरा चेति त्रिविधानामपि प्रगल्भानां नायिकानां ज्येष्ठा-कनिष्ठात्वेन पुनरपि भेदौ द्वौ भवतः अतः षट्प्रकाराः प्रगल्भाः भवन्ति। उक्तञ्च

द्वेधा ज्येष्ठाकनिष्ठाचेत्यमुग्धा द्वादशोदिताः।

अन्यानिर्णयः

या विधिपूर्वकं परिणीता भवति सा स्वीया भवति तद्भिन्ना नायकेन सह अपरिणीतापि तत्र अनुरागवती नायिका अन्या कथ्यते।

अन्या नायिकेयं द्विप्रकारा भवति -

(१) अपरिणीता कन्यका (२) अन्येन परिणीता।

अत्र प्रमाणञ्च दशरूपकस्य वचनमस्ति। यथा -

अन्यस्त्री कन्यकोढा च नान्योढाङ्गिरसे क्वचित्। इति

(१) अपरिणीता कन्या

या काचिन्नायिका विवाहात् पूर्वं कञ्चित् नायकं स्नेहेन वाञ्छति तदा सा नायके अनुरागवती किन्तु अविवाहिता स्त्री अन्या कथ्यते। यस्या उदाहरणं सर्वत्र काव्यनाटकेषु बहुशः दृश्यते। यथा अभिज्ञाने शकुन्तला, कुमारसम्भवे पार्वती, नैषधे दमयन्ती, मालतीयाधवे मालतीत्याद्याः नायिकाः अपरिणीतकन्यकाः सन्ति।

(२) अन्यपरिणीता

या काचिन्नायिका अन्येन सह विवाहितापि अन्यं पुरुषं वाञ्छति सा अविवाहितस्य कृते अन्यास्त्री कथ्यते।

उदाहरणम्

यथा - दृष्टिं हे प्रतिवेशिना ....।

अत्र एकेन विवाहिता अन्यं वाञ्छति अतोऽस्या उदाहरणम्।

नाटकादिदशरूपकलक्षणचर्चा

दशरूपकेषु प्रथमं रूपकं नाटकमस्ति, अतः प्रथमं नाटकलक्षणस्वरूपं विमृश्यते।

(१) नाटकम्

नाटकलक्षणविषये प्रायः भरताभिनवगुप्तविश्वनाथधनञ्जयादयः साहित्यिकाः एकमताः सन्ति तत्र कथावस्तुविषये श्रीभरतः प्रख्यातं कथावस्तु भवति इति भणति। तत्र आचार्याभिनवगुप्तास्तु महाभारतादिकं प्रख्यातमेव कथावस्तु इति प्रतिपादयन्ति। आचार्यश्च विश्वनाथपञ्चाननः "नाटकं ख्यातवृत्तं स्यात्" इति भरतमेवानुसरति।

विषयः

पूर्वचर्चया सिद्धं भवति यत् नाटकस्य विषयः पुराणप्रसिद्धः भवेत्।

नायकः

नाटकस्य नायकः उदात्तः स्यात्, अनेन फलति यत् धीरललित-धीरप्रशान्त-धीरोद्धत-धीरोदात्तानां चतुर्णामपि नायकानां ग्रहणं भवति इति अभिनवगुप्तानां मतमस्ति। स च वीररसयोग्यो भवति।

आचार्यः विश्वनाथस्तु "दिव्याथ दिव्यादिव्यो वा गुणवान्नायको मतः" इति प्रतिपादयामास। अभिनवगुप्तमते देवाः नायकाः भवितुं नार्हन्ति। धनञ्जयमते देवोऽपि नायकः भवितुं शक्नोति। यथा -

"प्रख्यातवंशो राजर्षिः दिव्यो वा यत्र नायकः"

रसः

नाटके वीर एव एकः प्रधानः रसः भवति इति अभिनवगुप्तमतमस्ति । अन्ये रसाः सहायकाः भवन्ति ।

नाटकरचना

अत्र श्रीधनञ्जयविश्वनाथाभिनवगुप्तपादानां आचार्याणां प्रायः समानमतमस्ति । यथा –

"काव्यं गोपुच्छाग्रं कर्तव्यं कार्यबन्धमासाद्य"
"गोपुच्छाग्रसमाग्रं तु बन्धनं तस्य कीर्तितम्"

यथा धेनोः पुच्छे केचन बालाः ह्रस्वाः केचन दीर्घाः तथैव केचनाङ्काः ह्रस्वाः केचन च दीर्घाः कर्तव्या इति ।

शैली

अत्र श्रव्यैः वाक्यैः मधुरा, हितोपदेशयुक्ता, लोकप्रसिद्धैः शब्दैः युक्ता, सर्वजनसंवेद्या, गुणालङ्कारभूषिता कैशिक्यादिवृत्तिभिः सहिता, नूतनशब्दावलीसंवलिता, नवनवोन्मेशालिनी शैली प्रयोज्या ।

इत्थं नाटकलक्षणविमर्शः वर्तते ।

(२) प्रकरणम्

द्वितीयरूपकमस्ति प्रकरणम् । एतस्यलक्षणं साहित्यदर्पणे विश्वनाथ एवं वक्ति। यथा –

"भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्"

अस्यायमर्थः प्रकर्षेण क्रियते कल्प्यते नेता फलं वस्तु वा यत्र तत् प्रकरणं तत्र दृश्यकाव्ये वृत्तं नायकचरितं लौकिकं, कविप्रतिभानिर्मितं भवति ।

भरतमुनिरप्याह

"यत्र कविराजबुद्ध्या वस्तुशरीरं नायकञ्च"

नेता

डिमे मर्त्यभिन्नः देवः, गन्धर्वः, यक्षः, राक्षसः, नागः वा नेता भवति। अत्र भूतप्रेतपिशाचादयश्च पात्राणि भवन्ति उद्धस्वभाववन्ति षोडशसंख्याकानि पात्राणि भवन्ति।

रसः

अत्र धनञ्जयमते रौद्रः प्रधानः भवति रौद्रभिन्ना अन्ये रसाः अङ्गभूताः जायन्ते।

अङ्काः-वर्णनम्

डिमे चत्वारोऽङ्काः भवन्ति चात्र सूर्यचन्द्रग्रहणयोः दृश्यं दर्शितं भवति, विमर्शसन्धिः न भवति।

उदाहरणम्

यथा त्रिपुरदाहः डिमः वर्तते।

प्रहसनम् (५)

प्रहसनं हास्यप्रधानं मनोरञ्जनप्रधानञ्च भवति अत्रापि धूर्तस्य चरितं भवति प्रधानम्। अत्र प्रहसने आकाशभाषितेन परस्परं संभाषणं भवति। कुत्रचिद् भारतीवृत्तिसहितं प्रहसनमपि दृश्यते।

श्रीधनञ्जयमते प्रहसनस्य भेदत्रयं भवति। यथा –

"तत्प्रहसनं त्रेधा शुद्धवैकृतशङ्करैः"

श्रीभरतमुनिमते द्विविधं भवति प्रहसनम्। यथा –

"शुद्धं सङ्करञ्चेति"

(१) शुद्धम्

श्रीधनञ्जयः शुद्धं प्रहसनम् एवं निरूपयति। यथा –

"पाखण्डविप्रप्रभृति चेटचेटीविटाकुलम्"

इदं शुद्धं प्रहसनं भरतमुनेः सङ्कीर्णमनुसरति यत्र प्रहसने विप्राणाम्, पाखण्डिनाम्, चेटचेटीविटानाञ्च समूहः भवति तत् शुद्धं प्रहसनं भवति।

(२) सङ्करम्

धूर्तजनसहितं प्रहसनं सङ्करमिति कथ्यते

अङ्कः

भरतमुनिः अङ्कविषये न कमपि निश्चयं करोति। परं धनञ्जयादिमते शुद्धप्रहसने एकोऽङ्कः भवति सङ्कीर्णं तु अनेकाङ्कं भवति। प्रायः एकाङ्कमेव प्रहसनं भवति। अत्र सन्धिद्वयं भवति। इदं भाणवद् भवति इति धनञ्जयमतमस्ति।

व्यायोगः (६)

धनञ्जयः व्यायोगं लक्षयति। यथा -

"ख्याऽतेतिवृत्तो व्यायोग ख्यातोद्धतनराश्रयः।
हीनो गर्भावमर्शाभ्याम् दीप्ताः स्युः हिमवद्रसाः ॥"

कथावस्तु

व्यायोगस्य कथानकम् इतिहासाद् संगृहीतं भवति।

नायकः

अस्य नायकः विख्यातः उद्धतः प्राकृतिकः नरः भवति।

सन्धिः

अत्र गर्भविमर्शाभ्यां अन्ये त्रयः सन्धयः भवति।

रसः

श्रृङ्गारं हास्यं च विहाय अन्ये दीप्ताः रसाः भवन्ति। अत्र शुद्धवर्णनं भवति। एतद्युद्धं नायिकायै न भवति अपितु अन्यस्मै भवति।

पात्राणि

अत्र पुरुषपात्राणां बाहुल्यं भवति स्त्रीपात्राणाञ्च न्यूनता भवति।

व्यायोगोऽयं एकदिनसाध्यः एकाङ्की च भवति। अस्योदाहरणन्तु भासकृतः मध्यमव्यायोगः वर्तते।

समवकारः (७)

श्रीधनञ्जयः सप्तमं रूपकभेदं समवकारं वक्षयति दशरूपके। यथा –

"कार्यं समवकारेऽपि आमुखं नाटकादिवत्।

.... **कुर्यात्प्रहसते यथा ॥"**

इति षड्भिः कारिकाभिः श्रीधनञ्जयः समवकारस्य स्वरूपं प्रतिपादयामास।

कथावस्तु

अस्य समवकारस्य कथावस्तु विख्यातं देवदैत्यादिमनुष्येतरसम्बद्धं भवति। एतस्मादेव अत्र इतिहासप्रसिद्धानि द्वादश दैवतानि रक्षांसि वा पात्राणि भवन्ति। यथा नाटके आमुखस्य स्थापना भवति तथैव समवकारेऽपि भवति।

सन्धिवृत्ती

अत्र पञ्चसन्धिषु विमर्षं विहाय अन्ये चत्वारः सन्धयः भवन्ति। वृत्तिष्वपि कैशिकीं त्यक्त्वा अन्याः वृत्तयः भारत्यारभटीसात्वत्यः भवन्ति।

अङ्काः

अत्र समवकारे त्रयोऽङ्काः भवन्ति। तत्र च त्रिषु धर्मत्रयं, शृङ्गाराश्च संयोजिताः भवन्ति। अत्र प्रथमेऽङ्के मुखप्रतिमुखसन्धिद्वयं भवति कथा च द्वादशनालिका भवति, द्वितीये चतस्त्रः बालिकाः, तृतीये द्वे नालिके कथे इत्त्थं कथाः भवन्ति।

उदाहरणम्

"समुद्रमन्थनम्" समवकारस्योदाहरणं वर्तते।

वीथी (८)

श्रीधनञ्जयः दशरूपकस्य तृतीये प्रकाशे वीथीमित्त्थं विमृशति। यथा

"वीथी तु कैशिकीवृत्तौ सन्ध्यङ्गाङ्कैस्तु भाणवत्।

.... **द्वयेकपात्रप्रयोजिता ॥"**

इत्त्थं द्वयोः कारिकयोः वीथीविमर्शः वर्तते।

अर्थः

वीथीशब्दस्यार्थः वर्तते मार्गः। तस्मादेवात्र अङ्कानां पंक्तिः वीथी इति कथ्यते।

रचना

वीथ्याः रचना कैशिकीवृत्तौ एव प्रकर्तव्या।

सन्ध्यङ्ककथाः

वीथ्यां सन्धिद्वयं मुखसन्धिः निर्वहणसन्धिः इति भवति । अस्याः कथानकं एकस्मिन्नङ्के निबद्धं भवति।

रसः

अत्र प्रधानरूपेण सूचनीयः रसः श्रृङ्गारः वर्तते, अन्येऽपि रसा ईषद्मात्रया भवन्ति।

वीथीयं प्रस्तावनाया अङ्गैः उद्घात्यकादिभिः सहिता द्वाभ्यां पात्राभ्यां एकेन वा पात्रेण प्रयोजिता भवति।

अङ्कः (९)

श्रीधनञ्जयः दशरूपके तृतीये प्रकाशे अङ्कं लक्षयति द्वाभ्यां कारिकाभ्याम्। यथा –

"उत्सृष्टिकाङ्के प्रख्यातं वृत्तं बुद्ध्या प्रपञ्चयेत्।

.... तथा जयपराजयैः ॥"

नाटकेऽपि अङ्कविभागः भवति, तस्माद् भिन्नोऽयमङ्कः इति प्रतिपादनाय अयमुत्सृष्टिकाङ्क इति कथ्यते।

कथा

अत्र प्रायः कथावस्तु इतिहासख्यातं भवति परमत्र कविः स्वप्रतिभया तत्र कथानके किञ्चित् परिवर्तनं कृत्वा सरसं कथावस्तु निरूपयति।

रसः

अस्याङ्कस्य प्रधानः रसः भवभूतिप्रियः करुणः वर्तते।

सन्धिवृत्ती

अत्राङ्के मुखप्रतिमुखसन्धिद्वयं वा भारतीवृत्तिः भवति । कथानकञ्च एकाङ्की भवति। प्राकृताः नराः पात्ररूपेण भवन्ति। विशेषतः अबलापात्राणां रुदनं, जयपराजयौ, वचोयुद्धं चात्र वर्ण्यन्ते। इत्यङ्कविचारः प्रस्तुतो मया।

ईहामृगः (१०)

श्री धनञ्जयः सार्धतिसृभिः कारिकाभिः ईहामृगलक्षणं लक्षयति। यथा –

"मिश्रमीहामृगे वृत्तं .... ।

.... वधं नैव महात्मनः ॥"

अर्थः

नायकेन खलनायकस्य वधे समुपस्थितेऽपि वधो न जायते तद्रूपमीहामृग इति उच्यते।

कथा

ईहामृगस्य कथा प्रख्याता काल्पनिका च अर्थात् इतिहासकल्पनोभयात्मका भवति।

अङ्काः

ईहामृगेऽस्मिन् चत्वारोऽङ्काः भवन्ति, त्रयः मुख-प्रतिमुख-निवर्हणाख्याः सन्धयो भवन्ति।

नायकः

अस्य नायकः नरः दैवीपुरुषः वा नायकखलनायकौ इतिहासप्रसिद्धौ धीरोद्धतौ च भवतः। अस्य च खलनायकः अज्ञानवशादयोग्यं कार्यं अनुतिष्ठति। स च दिव्यां नायिकां अपहरति तस्माद् श्रृङ्गारस्य आभासोऽपि जायते। कविः द्वयोः नायकप्रतिनायकयोः समुपस्थितं युद्धं येन केनापि प्रकारेण अवश्यं निवारयेत्। इत्त्थं ईहामृगचर्चा चर्चिताऽति।

कारिका

प्रथमः प्रकाशः

नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते।

मदाभोगधनध्वानो नीलकण्ठस्य ताण्डवे ॥१॥

दशरुपानुकारेण यस्य माद्यन्ति भावकाः ।

नमः सर्वविदे तस्मै विष्णवे भरताय च ॥२॥

कस्यचिदेव कदाचिद्दयया विषयं सरस्वती विदुषः ।

घटयति कमपि तमन्यो व्रजति जनो येन वैदग्धिम् ॥३॥

उद्धुत्योधृत्य सार यमखिलनिगमान्नाट्यवेदं विरिञ्चिः

चक्रे यस्य प्रयोगं मुनिरपि भरतस्ताण्डवं नीलकण्ठः ।

शर्वाणी लास्यमस्य प्रतिपदमपरं लक्ष्मकः कर्तृमिष्टे

नाट्यानां किन्तु किञ्चित्प्रगुणरचनया लक्षणं संक्षिपामि ॥४॥

व्याकिर्णे मन्दबुद्धिनां जायते मतिविभ्रमः ।

तस्यार्थस्तत्पदैस्तेन संश्रिप्य क्रियतेञ्जसा ॥५॥

आनन्दनिष्यन्दिषु रुपकेषु व्युत्पत्तिमात्रं फलमल्पबुद्धिः

योपीतिहासादिवदाह साधुस्तस्मै नमः स्वादुपराङ्मुखाय ॥६॥

अवस्थानुकृतिरनाट्यं रुपं दृश्यतयोच्यते ।

रूपकं तत्समारोपात्दशधैव रसाश्रयम् ॥७॥

लाटकं सप्रसरणं भाणः प्रहसनं डिमः ।

व्यायोगसमवकारौ वीथ्यङ्क्हेहामृगा इति ॥८॥

अन्यद्भावाश्रयं नृत्यं नृत्तं ताललयाश्रयम् ।

आद्यं पदार्थाभिनयो मार्गो देशी तथा परम् ॥९॥

मधुरोद्धत्तभेदेन तद् द्वयं द्विविधं पुनः ।

लास्यताण्डवरुपेण नाटकाद्युपकारकम् ॥१०॥

वस्तु नेता रसस्तेषां भेदकः वस्तु च द्विधा ।

तत्राधिकारिकं मुख्यमङ्गं प्रासाङ्गिकं विदुः ॥११॥

अधिकारः फलस्वाम्यमधिकारि च तत्प्रभुः ।
तन्निर्वृत्तमभिव्यापि वृत्तं स्यादाधिकारिकम् ॥१२॥
प्रासङ्गिकं परार्थस्य स्वार्थो यस्य प्रसङ्गतः ।
सानुबन्धं पताकाख्यं प्रकरि च प्रदेशभाक् ॥१३॥
प्रस्तुतागन्तुभावस्य वस्तुनोन्यक्तिसूचकम् ।
पताकास्थानकं तुल्यसंविधानविशेषणम् ॥१४॥
प्रख्यातोत्पाद्यमिश्रत्वभेदात्त्रेधापि तत्त्रिधा ।
प्रख्यातमितिहासादेरुत्पाद्यं कविकल्पितम् ॥१५॥
मिश्रं च सङ्करात्ताभ्यां दिव्यामर्त्यादिभेदतः ।
कार्यं त्रिवर्गस्तुच्छुद्धमेकानेकानुबन्धिच ॥१६॥
स्वल्पोद्दिष्टस्तु तद्धेतुर्बीजं विस्तार्नेकधा ।
अवान्तरार्थविच्छेदे विन्दुरच्छेदकारणम् ॥१७॥
बीजबिन्दुपताकाख्यपआकरिकार्यलक्षणाः ।
अर्थप्रकृतयः पञ्च ता एताः परिकीर्तिताः ॥१८॥
अवस्थां पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः ।
आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ॥१९॥
औत्सुक्यमात्रमारम्भः फललाभाय भूयसे ।
प्रयत्नस्तु तदप्राप्तौ व्यापारोतित्वरान्वितः ॥२०॥
उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसंभवः ।
अपायाभावतः प्राप्तिर्नियताप्तिं सुनिश्चिता ॥२१॥
समग्र फलसम्पत्तिः फलयोगो यथोदितः ।
अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः ॥२२॥
यथासंख्येन जायन्ते मुखाद्यां पञ्च संधयः ।

अन्तरैकार्थसंबन्धः संधिरेकान्वये सति ॥२३॥

मुखप्रतिमुखे गर्भः सावमर्शोपसंहृतिः ।

मुखं बीजसमुत्पत्तिर्नानार्थरससम्भवा ॥२४॥

अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात् ।

उपक्षेपः परिकरः परिन्यासो विलोभनम् ॥२५॥

उक्ति प्रप्तिः समाधानं विधानं परिभावनम् ।

उद्भेदवेदकरणान्यन्वर्थान्यथ लक्षणम् ॥२६॥

बीदान्यास उपछेपः तद्बाहुल्यं परिक्रिया ।

तन्निष्पत्ति परिन्यासः गुणाख्यानं विलोभनम् ॥२७॥

संप्रधारणमर्थाना युक्ति प्राप्ति सुखागमः ।

बीजागमः समाधानं विधानं सुखदुःखकृत् ॥२८॥

परिभावोऽद्भुतावेशः उद्भेदो गूढभेदनम् ।

करणं प्रकृतारम्भः भेदः प्रोत्साहना मता ॥२९॥

लक्ष्यालक्ष्यतयोद्भेदस्तस्य प्रतिमुखं भवेत् ।

बिन्दुप्रयत्नानुगमादङ्गान्यस्य त्रयोदश ॥३०॥

विलासः परिसर्पश्च विधूतं शमनर्मणी ।

नर्मद्युतिः प्रगमनं निरोधः पर्युपासनम् ॥३१॥

वज्रं पुष्पमुपन्यासो वर्णसंहार इत्यपि ।

रत्यर्थेहा विलासः स्याद्-दृष्टानष्टानुसर्पणम् ॥३२॥

परिसर्पः विधूतं स्यादरतिः

परिहासवचो नर्मधृतिस्तज्जा द्युतिर्मता ॥३३॥

उत्तरा वाक्प्रगमनं पितरोधो निरोधनम् ।

पर्युपास्तिरनुनयः पुष्पं वाक्यं विशेषवत् ॥३४॥

उपन्यासस्तु सोपायम् वज्रंप्रत्यक्षनिष्ठुरम्।
चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते ॥३५॥
गर्भस्ततु दृष्टनष्यस्य बीजस्यान्वेषणं मुहुः।
द्वादशाङ्गः पताका स्यान्न वा स्यत्प्राप्तिसंभवः॥३६॥
अभूताहरणं मार्गो रुपोदाहरणे क्रमः।
संग्रहश्चानुमानं च तोटकाधिबले यथा ॥३७॥
उद्वेगसंभ्रमाक्षापाः लक्षणं च प्रणीयते।
अभूताहरणं छद्म मार्गस्तत्त्वार्थकीर्तनम् ॥३८।
रुपं वितर्कवद्वाक्यं सोत्कर्षं स्यादुदाहृतिः।
क्रमः संचिन्तयमानप्ति भावज्ञानमथापरे ॥३९॥
संग्रहः सामदानोक्तिः अध्यूहो लिङ्गतोऽनुमा।
अधिबलमभिसंधिः संरब्धं तोटकं वचः ॥४०॥
तोटकस्यान्यथाभावं ब्रुवतेऽधिबलं बुधाः।
संरब्धवचनं यत्तु तोटकं तदुदाहृतम् ॥४१॥
उद्वेगोऽरिकृता भीतिः शडकात्रसौ च संभ्रमः।
गर्भबीजसमुद्भेदादाक्षेपः परिकीर्तितः ॥४२॥
क्रोधेनावमृशेद्यत्र व्यसनाद्वा विलोभनात्।
गर्भनिर्भिन्नबीजार्थः सोऽवमर्श इति स्मृतः॥४३॥
तत्रापवादसंफेटौ विद्रवद्रशक्तयः।
रुतिः प्रसङ्गश्छलनं व्यवसायो विरोधनम् ॥४४॥
प्ररोचना विचलनमादानं च त्रयोदश।
दोषप्रख्यापवादः स्यात् – संफेटो रोषभाषणम्।
विद्रवो वधबन्धादिः द्रबो गुरुतिरस्कृतिः ॥४५॥

विरोधशमनं शक्तिः तर्जनोद्वेजने द्युतिः ।
गुरुकीर्तनं प्रसङ्गः छलनं चावमाननम् ॥४६॥
व्यवसायः स्वशक्त्युक्तिः संरब्धानां विरोधनम् ।
सिद्धमन्त्रणतो भाविदर्शिका स्यात्प्ररोचना॥४७॥
विकत्थना विचलनमादानं कोर्यसङ्ग्रहम् ।
बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथयथम् ॥४८॥
ऐकार्थ्यमुपमीयन्ते यत्र निर्वहणं हि तत ।
सन्धिर्विधो ग्रथनं निरणयं परिभाषणम् ॥४९॥
प्रसादानन्दसमयां कृतिभषोपगूहनाम् ।
पूर्वभावोपसंहारौ प्रशस्तिश्च चतुर्दश ॥५०॥
सन्धिर्बीजोपगमनं निबोधं कार्यमार्गणम् ।
ग्रथनं तदुपक्षेपोऽनुभूताख्यो तु निर्णयम् ॥५१॥
परिभाषा मिथो जल्पं प्रसादं पर्युपासनम् ।
आनन्दो वाञ्छितालाप्तिं समयो दुम्कनिर्गमम् ॥५२।
कृतिर्लब्धार्थशमनं मानाद्याप्तिश्च भाषणम् ।
कार्यदृष्ट्यद्भुतप्राप्ति पूर्वभवोपगूहने ॥५३॥
वराप्तिं काव्यसंहारं प्रशास्ति शुभशंसनम् ।
उक्ताङ्गानां चतुम्षष्टिं षोढा चैषां प्रयोजनम् ॥५४॥
इष्टस्यार्थस्य रचना गोप्यगुप्तिं पूरकाशनम् ।
रागं प्रयोगस्याश्चर्यं वृत्तान्तस्यानुपक्षयम् ॥५५॥
द्वेधा विभागं कर्तव्यं सर्वस्यापीह वस्तुनम् ।
सूच्यमेव भवेत्किञ्चिद्दृशयश्रव्यमथपरम् ॥५६॥
नीरसोऽम्नुचितस्तत्र संसूच्यो वस्तुविस्तरम् ।
दृशयस्तु मधरोधात्तरसभावनिरन्तरम् ॥५७॥

अर्थोपक्षेपकैः सूच्यं पञ्चभिः प्रतिपादयेत्।

विष्कम्भचूलिकाङ्कास्याङ्कावतारप्रवेशकैः ॥५८॥

वृत्तवर्तिष्यमाणानांकथांशानांनिदर्शकः ।

संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः ॥५९॥

एकानेककृतः शुद्धः सङ्कीर्णोनीचमध्यमैः ।

तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः ॥६०॥

प्रवेशोऽङ्कद्वयस्यान्तः शेषार्थस्योपसूचकः ।

अन्तर्जवनिकासंस्थैश्चूलिकार्थस्य सूचना ॥६१॥

अङ्कान्तपात्रैरङ्कास्यं छिन्नाङ्कस्यार्थसूचनात्।

अङ्कावतारस्त्वङ्कान्ते पातोऽस्याविभागतः ॥६२॥

एभिः संसूचयेत् सूच्यं दृश्यमङ्कैः प्रदर्शयेत्।

नाट्यधर्ममपेक्ष्यैतत्पुनर्वस्तु त्रिधेष्यते ॥६३॥

सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम् ॥६४॥

द्विधाऽन्यन्नाट्यधर्माख्यंजनान्तमपवारितम्।

त्रिपताककरेणान्यानपवार्यान्तरा कथाम् ॥६५॥

अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम्।

रहस्यं कथ्यतेऽन्यस्य परावृत्त्यापवारितम् ॥६६॥

किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत्।

श्रुत्वेवानुक्तमप्येकस्तत्स्यादाकाशभाषितम् ॥६७॥

इत्याद्यशेषमिह वस्तुभेदजातं रामायणादि च विभाव्य बृहत्कथां च।

आसूत्रयत्तदनु नेतृरसानुगुण्याच्चित्रां – कथामुचितचारुवचःप्रपञ्चैः ॥६८॥

इति प्रथमः प्रकाशः

द्वितीयः प्रकाशः

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः ।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ॥१॥
बुद्ध्युत्साहीस्मृति प्रज्ञाकलामानसमन्वितः ।
शूरो द्रढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः ॥२॥
भेदैश्चतुर्धा ललितशान्तोदात्तोद्धतैरयम् ।
निश्चिन्तो धीरललितः कलासक्तः सुखी मृदुः॥३॥
सामान्यगुणयुक्तस्तु धीरशान्तो द्विजादिकः ।
महासत्वोऽस्तिगम्भीरः क्षमावानविकत्थनः ॥४॥
स्थिरो निगूढाहक्डारो धीरोदात्तो द्रढव्रतः ।
दर्पमायिष्ठभूयिष्ठो मायाछद्मपरायणः ॥५॥
धीरोदत्तस्तवहङ्कारी चलश्चण्डो विकत्थनः ।
स दक्षिणः शठो धृष्टः पूर्वा प्रत्यन्यया हृतः ॥६॥
दक्षिणोऽस्यां सहृदयः गूढविप्रियकृच्छठः ।
व्यक्ताङ्गवेकृतो धृष्टोऽनुकूलस्तवेकनायिकः ॥७॥
पताकानायकस्त्वन्यः पीठमदो विचक्षणः ।
तस्यैवानुचरो भक्तः किञ्चिदूनश्च तद्गुणैः ॥८॥
एकविद्यो विटश्चान्यो हास्यकृच्च विदूषकः ।
लुब्धो धीरोद्धतः स्तब्धः पापकृद्व्यसनी रिपुः ॥९॥
शोभा विलासो माधुर्यं गाम्भीर्यं स्थैर्यतेजसी ।
ललितौदार्यमित्यष्टौ सात्विकाः पौरुषा गुणाः ॥१०॥
नीचे धृणादिके स्पर्धा शोभायां शोभायां शौर्यदक्षते ।
गतिः सधैर्या द्रष्टिश्च विलासे सस्मितं वचः ॥११॥
श्लक्ष्णो विकारो माधुर्यं सक्षोभे सुमहत्यपि ।

गाम्भीर्ये यत्प्रभावेन विकारो नोपलक्ष्यते ॥१२॥

व्यवसायादचलनं स्थैर्यं विघ्नकुलादपि ।

अधिक्षेपाद्यसहनं तेजः प्राणात्ययेष्वपि ॥१३॥

श्रृङ्गाराकारचेष्टात्वं सहजं ललितं मृदुः ।

प्रियोक्त्याऽऽजीविताद्दानमौदार्यं सदुपग्रहः ॥१४॥

स्वान्या साधारणास्त्रीति तद्गुणा नायिका त्रिधा ।

मुग्धा मध्या प्रगल्भेति स्वीया शीलार्जवादियुक् ॥१५॥

मुग्धा नववयः कामा रतौ वामा मृदुः कृधि।

मध्योद्यद्यौवनानङ्गा मोहान्तासुरतक्षमा ॥१६॥

धीरा सोत्प्रासवक्रोक्त्या मध्या साश्रुकृतागमः।

खेदयद् दयितं कोपादधीरा परुषाक्षरम् ॥१७।

यौवनान्धा स्मरोन्मत्ता प्रगल्भा दयिताङ्गके।

विलीयमानेवानन्दाद्रतारम्भेऽप्यचेतना ॥१८॥

सावहित्थादरोदास्ते रतौ धीरेतरा कृधा।

सन्तर्ज्य ताडयेत् मध्या मध्याधीरेव तं वदेत् ॥१९॥

द्वेधा ज्येष्ठा कनिष्ठा चेत्यमुग्धा द्वादशोदिताः ।

अन्यस्त्री कन्यकोढा च नान्योढाङ्गिरसे क्वचित् ॥२०॥

कन्यानुरागमिच्छातः कुर्यादङ्गाङ्गिसंश्रयम् ।

साधारणस्त्री गणिका कलाप्रागाल्भ्यधौत्युकः ॥२१॥

छन्नकामासुखार्थाज्ञस्वतन्त्राहंयुपण्डकान् ।

रक्तेन रञ्जयेदाढ्यान्नि स्वान्मात्रा विवासयेत् ॥२२॥

रक्तैव त्वप्रहसने नैषा दिव्यनृपाश्रये ।

आसामष्टाववस्थाः स्युं स्वाधीनपतिकादिकाः ॥२३॥

आसान्नयत्तमरणा हृष्टा स्वाधीनभर्तृका।
मुदा वासकसज्जा स्वं मण्डयत्येष्यति प्रिये ॥२४॥
चिरयत्यव्यलीके तु विरहोत्कण्ठितोन्मनः।
ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता ॥२५॥
कलहान्तरिताऽमर्षाद्विधूतेऽनुशयातिर्युक्।
विप्रलब्धोक्तसमयमप्राप्तेऽतिविमानिता ॥२६॥
दूरदाशान्तरस्थे तु कार्यतः प्रोषितप्रिया।
कामार्ताऽभिसरेकान्तं सारयेद्वाभिसारिका ॥२७॥
चिन्तानिःश्वासखेदाश्रुवैवर्ण्यग्लान्यभूषणैः।
युक्ताः षडन्त्या द्वे चाद्ये क्रीडोज्जवल्यप्रहर्षितैः ॥२८॥
दूत्यो दासी सखी कारूर्धात्रेयी प्रतिविशिका।
लिङ्गिनी शिल्पिनी स्वं च नेतृ मित्रगुणान्विताः ॥२९॥
यौवने सत्वजाः स्त्रीणामलङ्कारोस्तु विशतिः।
भावो हावश्च हेला च त्रयस्तत्र शरीरजाः ॥३०॥
शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगलभता।
औदार्यं धैर्यमित्येते सप्तभावा अयत्नजाः ॥३१॥
लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम्।
मोट्टायितं कुट्टमितं बिब्बोको ललितं तथा ॥३२॥
विहृतं चेति विज्ञेया दश भावाः स्वभावजाः।
निर्विकारात्मकात्सत्वाद्भावास्तत्राद्यविक्रिया ॥३३॥
अल्पालापः सश्रृङ्गारो हावोऽक्षिभ्रूविकारकृत्।
स एव हेला सुव्यक्तश्रृङ्गाररससूचिका ॥३४॥
रूपोपभोगातारुण्यैः शोभाङ्गानां विभूषणम्।

मन्मथावापितच्छाया सैव कान्तिरिति स्मृता ॥३५॥
अनुल्बणत्वं माधुर्यं दीप्तिं कान्तेस्तु विस्तरः ।
निस्साध्वसत्वं प्रागल्भ्यम् औदार्यं प्रश्रयः सदा ॥३६॥
चापलाविहता धैर्यं चिद्वृत्तिरविकत्थना ।
प्रियानुकरणं लीला मधुराङ्गविचेष्टितैम् ॥३७॥
तात्कालिको विषेषस्तु विलासोऽङ्गक्रियोक्तिषु ।
आकल्परचनाल्पापिविच्छित्तिं कान्तिपोषकृत ॥३८॥
विभ्रम्सत्वरया काले भूषास्थानविपर्ययम् ।
क्रोधाश्रुहर्षभीत्यादे सडकरं किलकिञ्चितम् ॥३९॥
मोट्टायितं तु तद्भावभावनेष्टकथादिषु ।
सानन्दान्तं कुट्टमितं कुप्येत्केशाधरग्रहे ॥४०॥
गर्वाभिमानादिष्टेऽपिबिब्बोकोऽनादरक्रिया ।
सुकुमाराङ्गविन्यासो मसृणो ललितं भवेत ॥४१॥
प्राप्तकालं न यद्ब्रूयाद्व्रीडया विहृतं हि तत ।
मन्त्री स्वं वोभयं वापि सखा तस्यार्थचिन्तने ॥४२॥
मन्त्रिणा ललितं शेषा मन्त्रिस्वायत्तसिद्धयम् ।
ऋत्विक्पुरोहितौ धर्मे तपस्विब्रह्मवादिनम् ॥४३॥
सुहृत्कुमाराटविका दण्डे सामन्तसैनिकाम् ।
अन्तम्पुरे वर्षवरां किराता मूकवामनाम् ॥४४॥
म्लेच्छाभीरशकाराद्यां स्वस्वकार्यापयोगिनम् ।
ज्येष्ठमध्याधमत्वेन सर्वेषां च त्रिरूपता ॥४५॥
तारतम्याद्याथोक्तानां गुणानां चोत्तमादिता ।
एवं नाट्ये विधातव्यो नायकं सपरिच्छदम् ॥४६॥

तद्व्यापारात्मिका वृत्तिश्चतुर्धा तत्र कैशिकी।

गीतनृत्याविलासाद्यै मृदुशृङ्गार्यपि चेष्टितैम्। ॥४७॥

नर्मस्फिञ्जं सुखारम्भो भयान्तो नवसङ्गमे।

वैदग्ध्यक्रिडितं नर्म प्रियोपच्छदनात्मकम् ॥४८॥

हास्येनैव सशृङ्गारभयेन विहितं त्रिधा।

आत्मोपक्षेपसम्भोगमानै शृङ्गार्यपि त्रिधा ॥४९॥

शुद्धमङ्गं भयं द्वेधा त्रेधा वाग्वेषचेष्टितैम्।

सर्व सहास्यमित्येवं नर्माष्टादशधोदितम् ॥५०॥

नर्मस्फोटस्तु भावानां सूचितोऽल्परसे लवैम् ॥५१॥

छन्ननेतृप्रतीचारो नर्मगर्भोऽर्थहेतवे।

अङगैं सहास्यनिर्हास्यैरेभिरैषोऽत्रकैशिकी ॥५२॥

विशोको सात्वती सत्त्वशौर्यत्यागदयारर्जवैम्।

संृलापोत्थापकावस्थां साङ्घात्यं परिवर्तकम् ॥५३॥

संलापको गभीरोक्तिर्नानाभावरसा मिथम्।

उत्थापकस्तु यत्रादौ युद्धायोत्थापयेत्परम् ॥५४॥

मन्त्रार्थदैवशक्तयादे साङ्घात्यं सङ्घभेदनम्।

प्रारब्धोत्थानकार्यान्यकरणात्परिवर्तकम् ॥५५॥

एभिरङ्गैचश्चतुर्धेयं सात्तवत्यारभटी पुनम्।

मायेन्द्रजालसङ्ग्रामक्राद्धान्तादिचेष्टितैम् ॥५६॥

सङ्क्षिप्तिका स्यात्संफेटो वस्तुत्थानावपातने।

सङ्क्षिप्तवस्तुरचना सङ्क्षिप्तिं शिल्पयोगतम् ॥५७॥

पूर्वनेतृनिवृत्त्यान्ये नेत्रन्तरपरिग्रहम्।

सम्फेटस्तु समाघातं क्रुद्धसंरब्धयोर्द्वयोम् ॥५८॥

मायाद्युत्थापितं वस्तु वस्तुत्थापनमिष्यते।
अवपातस्तु निष्क्रामप्रवेशत्रालविद्रवैम् ॥५९॥
एभिरङ्गैश्चतर्धेयं नार्थवृत्तिरतं परा।
चतुर्थी भारती सापि वाच्या नाटकालक्षणे ॥६०॥
कैशिकी सात्वती चार्थवृतिमारभटीमिति।
पठन्तं पञ्चमीं वृत्तिमौद्भटां प्रतिजानते ॥६१॥
शृङ्गारे कैशिकी वीरे सात्त्वत्यारभटी पुनम्।
रसे रौद्रे च बीभत्से वृत्तिं सर्वत्र भारती ॥६२॥
देशभाषाक्रियावेषलक्षणा स्यु प्रवृत्तयम्।
लोकादेवावगम्यैता यथौचित्यं प्रयोजयेत ॥६३॥
पाठ्यं तु संस्कृतं नृणामनीचानां कृतात्मनाम्।
लिङ्गिगनीनां महादेव्या मन्त्रजावेश्ययों क्वचित ॥६४॥
स्त्रीणां तु प्राकृतं प्रायं शौरसेन्यधमेषु च।
पिशाचात्यन्तनीचादौ पैशाचं मागधं तथा ॥६५॥
यद्देशं नीचपात्रं यत्तद्देशं तस्य भाषितम्।
कार्यतश्चोत्तमादीनां कार्यो भाषाव्यतिक्रमम् ॥६६॥
भगवन्तो वरैर्वाच्या विद्धद्देवर्षिलिङ्गिनम्।
विप्रामात्याग्रजाश्चार्था नटीसूत्रभूतौ मिथम् ॥६७॥
रथी सूतेन चायुष्मान्पूजेयैः शिषेयात्मजानुजाः।
वत्सेति तातः पूज्योSपि सुगृहिताभिधस्तु तै ॥६८॥
भावोS नुगेन सूत्री च मार्शेत्येतेन सोSपि च।
देवः स्वामीति नृपतिभृतेयैर्भट्टेति चाधमैः ॥६९॥
आमन्त्रणीयाः पतिज्ज्येष्ठमध्याधमैः स्त्रीयः।

समा हलेति प्रश्या च हञ्जे वेश्याऽज्जुका तथा ॥७०॥
कुट्टिन्यम्बेत्यनुरतैः पूज्या वा जरती जनैः ।
विदूषक्ण भवती राज्ञी चेटीति शबेद्यते ॥७१॥
चेष्टागुणोगाहृतिसत्त्वभावा नशेशतो नेतृदशाविभिन्नान् ।
को वक्तुमीशो भरतो न यो वा यो वा न देवः शशिखण्डमौलिः ॥७२॥

इति द्वितीयः प्रकाशः

तृतीयः प्रकाशः

प्रकृतित्वादथान्येषां भूयोरसपरिग्रहात् ।
सम्पूर्णलक्षणत्वाच्च पूर्वं नाटकमुच्यते ॥१॥
पूर्वरङ्गं विघायादौ सूत्रधारे विनिर्गते ।
प्रविश्य तद्वदपरः काव्यमास्थापयान्नटः ॥२॥
दिव्यमर्त्ये स तद्रूपो मिश्रमन्य रस्तयोः ।
सूचयेद्वस्तु बीजं वा मुखं पात्रमथापि वा ॥३॥
रंगं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः ।
ऋतुं कञ्चिदुपादाय भारतीं वृत्तिमाश्रयेत् ॥४॥
भारतीं संस्कृतप्रायो वाग्व्यापारो नटाश्रयः ।
भेदैः प्ररोचनायुक्तैर्वीथीप्रहसनामुखैः ॥५॥
उन्मुखीकरणं तत्र प्रशंसातः प्ररोचना ।
वीथी प्रहसनं चापि स्वप्रसङ्गेऽभिघास्यते ॥६॥
वीथ्यङ्गान्यामुखत्वादुच्यन्तेऽत्रैव तत्पुनम् ।
सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम् ॥७॥
स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ।
तत्र स्युं कथोद्धातं प्रवुत्तकम् ॥८॥

प्रयोगतिशयश्चाथ वीथ्यङ्गानि त्रयोदश।
स्वेतिवृत्तसमं वाक्यमर्थं वा तत्र सूत्रिणम् ॥९॥
गृहीत्वा प्रविशेत्पात्रं कथोद्धातो द्विधैव सम्
कालसाम्यसमाक्षिप्तप्रवेशं स्यात्प्रवृत्तकम् ॥१०॥
एषोऽयमित्युपक्षेपात्सूत्रधारप्रयोगतम्।
पात्रप्रवेशो यत्रैष प्रयोगातिशयो मतम् ॥११॥
उद्धात्यकावलगिते प्रपञ्चत्रिगते छलम्।
वाक्केल्यधिबले गण्यमवस्यन्दितनालिके ॥१२॥
असत्प्रलापव्याहारमृदवानि त्रयोदश।
गूढार्थपदपर्यायमाला प्रश्नोत्तरस्य वा ॥१३॥
यत्रान्योन्यं समालापो द्वेधोद्धात्यं तदुच्यते।
यत्रौकत्र समावेशात्कार्यमन्यत्प्रसाध्यते ॥१४॥
पस्तुतेऽन्यत्र वान्यत्स्यात्त च्चावलगितं द्विधा।
असद्भूतं मिथस्तोत्रं प्रपञ्चो हास्यकृन्मतम् ॥१५॥
श्रुतिसाम्यादनेकार्थयोजनं त्रिगतं त्विह।
नटादित्रितयालापं पूर्वरङ्गे तदिष्यते ॥१६॥
प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य छलनाच्छलम्।
विनिवृत्तस्य वाक्केली द्विस्त्रि प्रत्युक्तितोऽपि वा ॥१७॥
अन्योन्यवाक्याधिक्योक्ति स्पर्धायाधिभ्बलं भवेत।
गण्डं प्रस्तुतसम्बन्धिबभिन्नार्थं सहसोदितम् ॥१८॥
रसोक्तस्यान्यथा व्याख्या यत्रावस्यन्दितं हि तत्।
सोपहासा निगूढार्था नालिकैव प्रहेलिका ॥१९॥
असम्बद्धकथाप्रायोऽसत्प्रलापो यथोत्तरम्।

अन्यार्थमेव व्याहारो हास्यलोभकरं वचम् ॥२०॥
दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत ।
एषामन्यतमानार्थं पात्रं चाश्रिप्य सूत्रभृत ॥२१॥
प्रस्तावनान्ते निर्गच्छेत्ततो वस्तु प्रराञ्चयेत ।
अभिगम्यगुणैर्यक्तो श्रीरोदात्तं प्रतापवान ॥२२॥
कीर्तिकामो महोत्साहस्त्रय्यास्त्राता महीपतिम् ।
प्रख्यातवंशो राजर्षिर्दिव्यो वा यत्र नायकम् ॥२३॥
तत्प्रख्यातं विधातव्यं वृत्तमत्राधिकारिकम् ।
यत्तत्रानुचितं कञ्चिन्नायकस्य रसस्य वा ॥२४॥
विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत ।
आद्यन्तमेवं निश्चित्य पञ्चधा तद्विब्बज्य च ॥२५॥
खण्डशं सन्धिसंज्ञास्तान्विभागानपि खण्डयेत ।
चतुम्षष्ठिस्तु तानि स्युड्गानीति अपरं तथा ॥२६॥
पताकावृत्तमप्यूनमेकाद्यैरनुसन्धभिम् ।
अङ्गान्यत्र यथालाभमसन्धिं प्रकरीं न्यसेत ॥२७॥
आदौ विष्कम्भकं कुर्यादङ्कं वा कार्ययुक्तितम् ।
अपेक्षितं परित्यज्य नीरसं वस्तुविस्तरम् ॥२८॥
यदा सन्दर्शयेच्छेषं कुर्याद्विष्कम्भकं तदा ।
यदा तु सरसं वस्तुमूलादेव प्रवर्तते ॥२९॥
आदावेव तदाङ्कं स्यादामुखाक्षेपसंश्रयम् ।
प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरस्कृतम् ॥३०॥
अङ्को नानाप्रकारार्थसंविघानरसाश्रयः ।
अनुभावाभ्यां स्थायिना व्यभिचारिभिः ॥३१॥

गृहीतमुक्तैः कर्तव्यमङ्गिनः परिपोषणम् ।
न चातिरसतो वस्तु दूरं विच्छिन्नतां नयेत् ॥३२॥
रसं वा न तिरोदध्याद् वस्त्वलंकारलक्षणैः ।
एको रसोऽङ्गी कर्तव्यो वीरः श्रृङ्गार एव वा ॥३३॥
अङ्गमन्ये रसाः सर्वे कुर्यान्निर्वहणेऽद्भुतम् ।
दूराध्वानं वधं युद्धं राज्यदेशादिविप्लवम् ॥३४॥
संरोधं भोजनं स्नानं सुरतं चानुलेपनम् ।
अम्बरग्रहणादीनि प्रत्यक्षाणि न निर्दिशेत् ॥३५॥
नाधिकारिवधं क्वापि त्याज्यमावश्यकं न च ।
एकाहाचरितैकार्थमित्थमासन्ननायकम् ॥३६॥
पात्रैस्त्रिचतुरैरङ्कं तेषामन्तेऽस्य निर्गमः ।
पताकास्थानकान्यत्र बिन्दुरन्ते च बीजवत् ॥३७॥
एवनङ्काः प्रकर्तव्याः प्रदेशादिपुरस्कृताः ।
पञ्चाङ्कमेतदवरं दशाङ्कं नाटकं परम् ॥३८॥
अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम् ।
अमात्यविप्रवणिजामेकं कुर्याच्च नायकम् ॥३९॥
धीरप्रशान्तं सापायं धर्मकामार्थतत्परम्।
शेषं नाटकवत्सन्धिप्रवेशकरसादिकस् ॥४०॥
नायिका तु द्विधा नेतुः कुलस्त्री गणिका तथा ।
क्वचिदेकैव कुलजा वेश्या क्वापि द्वयं क्वचित् ॥४१॥
कुलजाभ्यन्तरा, वाह्या वेश्या, नातिक्रमोऽनयः ।
आभिः प्रकरणं त्रेधा, सङ्कीर्णं धूर्तसङ्कुलम् ॥४२॥
लक्ष्यते नाटिकाप्यत्र सङ्कीर्णान्यनिवृत्तये ।

तत्र वस्तुप्रकरणान्नाटकान्नायको नृपः ॥४३॥
प्रख्यातो धीरललितः श्रृङ्गारोऽङ्गी सलक्षणः ।
स्त्रीप्रायचतुरङ्कादिभेदकं यदि चेष्यते ॥४४॥
एकद्वित्र्यङ्कपात्रादिभेदेनानन्तरुपता ।
देवी तत्र भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा ॥४५॥
गम्भीरा मानिनी, कृच्छ्रात्तद्वशान्नेतृसंगमः ।
नायिका तादृशी मुग्धा दिव्या चातिमनोहरा ॥४६॥
अन्तः पुरादिसम्बन्धादासन्ना श्रुतिदर्शनैः ।
अनुरागो नवावस्थो नेतुस्तस्यां यथोत्तरम् ॥४७॥
नेता तत्र प्रवर्त्तेत देवीत्रासेन शंकितः ।
कैशिक्यङ्गै श्चतुर्भिश्च युक्ताङ्कैरिव नाटिका ॥४८॥
भाणस्तु धूर्तचरितं स्वानुभूतं परेण वा ।
यत्रोपवर्णयेदेको निपुणः पण्डितो विटः ॥४९॥
सम्बोधनोक्तिप्रत्युक्ती कुर्यादाकाशभषितैः ।
सूचयेद्विरश्रृं गारौ शौर्यसौभाग्यसंस्तवैः ॥५०॥
भूयसा भरती वृत्तिरेकाङ्के वस्तु कल्पितम् ।
मुखनिर्वहणे साङ्गे लास्याङ्गानि दशापि च ॥५१॥
गेयं पदं स्थितं पाठ्यमासीनं पुष्पगण्डिका ।
प्रच्छेदकस्त्रिगूढं च सैन्धवाख्यं द्विगूढकम् ॥५२॥
उत्तमोत्तमकं चान्यदुक्तप्रत्युक्तमेव च ।
लास्ये दशविधं ह्येतदङ्गनिर्देशकल्पनम् ॥५३॥
तद्वत्प्रहसनं त्रेधा शुद्धवैकृतसङ्करैः ।
पाखण्डविप्रप्रभृतिचेटचेटीविटाकुलम् ॥५४॥

चेष्टितं वेषभाषाभिः शुद्धं हास्यवचोन्वितम्।
कामुकादिवचोवेषैः षण्ढकञ्चुकितापसैः ॥५५॥
विकृतं सङ्कराद्वीथ्या सङ्कीर्णं धूर्तसंकुलम्।
रसस्तु भूयसा कार्यः षड् विधो हास्य एव तु ॥५६॥
डिमे वस्तु प्रसिद्धं स्याद् वृत्तयः कैशकिीं विना।
नेतारो देवगन्धर्वयक्षरक्षोमहोरगाः ॥५७॥
भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः।
रसैरहास्यश्रृङ्गारैः षड् भिर्दीप्तैः समन्वितः ॥५८॥
मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।
चन्द्रसूर्योपरागैश्च न्याय्ये रौद्ररसेऽङ्गिनि ॥५९॥
चतुरङ्कःचतुस्सन्धिर्निर्विमर्शो डिमः स्मृतः।
ख्यातेतिवृत्तो व्यायोगः ख्यातोद्धतनराश्रयः ॥६०॥
हीनो गर्भविमर्शाभ्यां दीप्ताः स्युर्डिमवद्रसाः।
अस्त्रीनिमित्तसंग्रामो जागदग्न्यजये तथा ॥६१॥
एकाहाचरितैकाङ्को व्यायोगो बहुभिर्नरैः।
कार्ये समवकारेऽपि आमुखं नाटकादिवत् ॥६२॥
ख्यातं देवासुरं वस्तु निर्विमर्शास्तु सन्धयः।
वृत्तयो मन्दकैशिक्यो नेतारो देवदानवाः ॥६३॥
द्वादशोदात्तविख्याताः फलं तेषां पृथक्पृथक्।
बहुवीररसाः सर्वे यद्वदम्भोधिमन्थने ॥६४॥
अङ्कैस्त्रिभिस्त्रिकपटस्त्रिश्रृङ्गारस्त्रिविद्रवः।
डद्वसन्धिरङ्कः प्रथमः कार्यो द्वादशनालिकः ॥६५॥
चतुर्द्विनालिकावन्त्यौ नालिका घटिकाद्वयम्।

वस्तुस्वभावदैवारिकृताः स्युः कपटास्त्रयः ॥६६॥
नगरोपरोधयुद्धे वाताग्न्यादिकविद्रवाः ।
धर्मार्थकामैः श्रृङ्गारो नात्र बिन्दुप्रवेशकौ ॥६७॥
वीथ्यङ्गानि यथालाभं कुर्यात्प्रहसने यथा ।
वीथी तु कैशिकीवृत्तौ सन्ध्यङ्गाङ्कैस्तु भाणवत् ॥६८॥
रसः सूच्यस्तु श्रृङ्गारः स्पृशेदपि रसान्तरम् ।
युक्ता प्रस्तावनाख्यातैरङ्गैरुद्धात्यकादिभिः ॥६९॥
एवं वीथी विधातव्या द्वयेकपात्रप्रयोजिता ।
उत्सृष्टिकाङ्के प्रख्यातं वृत्तं बुद्ध्या प्रपञ्चयेत् ॥७०॥
रसस्तु करुणः स्थायी नेतारः प्राकृता नराः ।
भाणवत्सन्धिवृत्त्यङ्गैर्युक्तिः स्त्रीपरिदेवितैः ॥७१॥
वाचा युद्धं विधातव्यं तथा जयपराजयौ ।
मिश्रमिहामृगे वृत्तं चतुरङ्कं त्रिसन्धिमत् ॥७२॥
नरदिव्यावनियमान्नायकप्रतिनायकौ ।
ख्यातौ धीरोद्धतावन्त्यो विपर्यासादयुक्तकृत् ॥७३॥
दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः ।
श्रृङ्गाराभासमप्यस्य किञ्चिकिञ्चित्प्रदर्शयेत् ॥७४॥
संरम्भं परमानीय युद्धं व्याजान्निवारयेत् ।
वधप्राप्तस्य कुर्वीत वधं नैव महात्मनः ॥७५॥
इति तृतीयः प्रकाशः

चतुर्थः प्रकाशः

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
आनीयमानः स्वाद्यत्वं स्थायी भावो रसः स्मृतः ॥१॥
ज्ञायमानतया तत्र विभावो भावपोषकृत् ।

आलम्बनोद्दीपनत्वप्रभेदेन स च द्विधा ॥२॥

अनुभावो विकारस्तु भावसंसूचनात्मकः ।

हेतुकार्यात्मनोः सिद्धिस्तयोः संव्यवहारतः ॥३॥

सुखदुःखादिकैर्भावैर्भावस्तद्भावभावनम् ।

पृथग्भावा भवन्त्यन्येऽनुभावत्वेऽपि सात्त्विकाः ॥४॥

संत्त्वादेव समुत्पत्तेस्तच्च तद्भावभावनम् ।

स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्यवेपथुः ॥५॥

अश्रुवैस्वर्यमित्यष्टौ, स्तम्भोऽस्मिन्निष्क्रियाङ्गता ।

प्रलयो नष्टसंज्ञत्वम्, शेषाः सुव्यक्तलक्षणाः ॥६॥

विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।

स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ ॥७॥

निर्वेदग्लानिशङ्काश्रमधृतिजडताहर्षदैन्यौग्र्यचिन्ता-

स्त्रासेर्ष्यामर्षगर्वाः स्मृतिमरणमदाः सुप्तनिद्राविबोधाः ।

व्रीडापस्मारमौनाः सुमतिरलसतावेगतर्कावहित्था

व्याध्युन्मादौ विषादोत्सुकचपलयुतास्त्रिंशदेते त्रयश्च ॥८॥

तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननम् ।

तत्र चिन्ताश्रुनिःश्वासवैवर्ण्योच्छ्वासदीनताः ॥९॥

रत्याद्यायासतृट्क्षुद्भिर्ग्लानिर्निष्प्राणतेह च ।

वैवर्ण्यकम्पानुत्साहक्षामाङ्गवचनक्रियाः ॥१०॥

अनर्थप्रतिभा शङ्का परक्रौर्यात्स्वदुर्नयात् ।

कम्पशोषाभिवीक्षादिरत्र वर्णस्वरान्यता ॥११॥

श्रमः खेदोऽध्वरत्यादेः स्वेदोऽस्मिन्मर्दनादयः ।

सन्तोषो ज्ञानशक्त्यादेर्धृतिरव्यग्रभोगकृत् ॥१२॥

अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः ।
अनिमिषनयननिरीक्षण तूष्णींभावादयस्तत्र ॥१३॥
प्रसत्तिरुत्सवादिभ्यो हर्षोऽश्रुस्वेदगद्गदाः ।
दौर्मत्याद्यैरनौजस्यं दैन्यं कार्ष्ण्यामृजादिमत् ॥१४॥
दुष्टेऽपराधदौर्मुख्यक्रोयैैश्चण्डत्वमुग्रता ।
तत्र स्वेदशिरः कम्पतर्जनाताडनादयः ॥१५॥
व्यानं चिन्तेहितानाप्तेः शून्यताश्वासतापकृत् ।
गर्जितादेर्मनः क्षोभस्त्रासोऽत्रोत्कम्पितादयः ॥१६॥
परोत्कर्षाक्षमाऽसूया गर्वदौर्जन्यमन्युजा ।
दोषोक्त्यवज्ञे भ्रुकुटिमन्युक्रोधेङ्गितानि च ॥१७॥
अधिक्षेपापमानादेरमर्षोऽभिनिविष्टता ।
तत्र स्वेदशिरः कम्पतर्जनाताडनादयः ॥१८॥
गर्वोऽभिजनलावण्यबलैश्वर्यादिभिर्मदः ।
कर्माण्याधर्षणावज्ञा सविलासाङ्गवीक्षणम् ॥१९॥
सदृशज्ञानचिन्ताद्यैः संस्कारात्स्मृतिरत्र च ।
ज्ञातत्वेनार्थभासिन्यां भ्रूसमुन्नयनादयः ॥२०॥
मरणं सुप्रसिद्धत्वादनर्थत्वाच्च नोच्यते ।
हर्षोत्कर्षो मदः पानात्स्खलदङ्गवचोगतिः ॥२१॥
निद्रा हासोऽत्र रुदितं ज्योष्ठमध्याधमादिषु ।
सुप्तं निद्रोद्भवं तत्र श्वासोच्छ्वासक्रिया परम् ॥२२॥
मनस्संमीलनं निद्रा चिन्तालस्यक्लमादिभिः ।
तत्र जम्भाङ्गभङ्गाक्षिमीलनोत्स्वप्नतादयः ॥२३॥
विबोधः परिणामादेस्तत्र जृम्भाक्षिमर्दने ।

दुराचारादिभिर्व्रीडा धष्टर्याभावस्तमुन्नयेत्।
साचीताङ्गावरणवैवर्ण्याधोमुखादिभिः ॥२४॥
आवेशो ग्रहदुःखाद्यैरपस्मारो यथाविधिः।
भूपातकम्पप्रस्वेदलालाफेनोद्गमादयः ॥२५॥
मोहो विचित्तता भीतिदुःखावेशानुचिन्तनैः।
तत्राज्ञानभ्रमाघातघूर्णनादर्शनादयः ॥२६॥
भ्रान्तिच्छेदोपदेशाभ्यां शास्त्रादेस्तत्त्वधीर्मतिः।
आलस्यं श्रमगर्भादेर्जाड्यं जृम्भासितादिमत् ॥२७॥
आवेगः सम्भ्रमोऽस्मिन्नभिसरजनिते शस्त्रनागाभियोगो
वातात्पांसूपदिग्धस्त्वरित पदगतिर्वर्षजे पिण्डिताङ्गः।
उत्पातात्स्रस्तताङ्गेष्वहितहितकृते शोकहर्षानुभावा.
वह्नेर्धूमाकुलास्यः करिजमनु भयस्तम्भकम्पापसाराः ॥२८॥
तर्को विचारः सन्देहाद् भ्रूशिरोङ्गुलिनर्तकः।
लज्जाद्यैर्विक्रियागुप्तावहित्थाङ्गविक्रिया।
व्याधयः सन्निपाताद्यास्तेषामन्यत्र विस्तरः ॥२९॥
अपेक्षाकारितोन्मादः सन्निपातग्रहादिभिः।
अस्मिन्नवस्था रुदितगीतहासासितादयः ॥३०॥
प्रारब्धकार्यासिद्ध्यादेर्विषादः सत्त्वसंक्षयः।
निःश्वासोच्छ्वासहृत्तापसहायान्वेषणादिकृत् ॥३१॥
कालाक्षमत्वमौत्सुक्यं रम्येच्छारतिसम्भ्रमैः।
तत्रोच्छ्वासत्वराश्वासहृत्तापस्वेदविभ्रमाः ॥३२॥
मात्सर्यद्वेषरागादेश्चापलं त्वनवस्थितिः।
तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः ॥३३॥

विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः ।
आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः ॥३४॥
रत्युत्साहजुगुप्साः क्रोधो हासः स्मयो भयं शोकः ।
शममपि केचित्प्राहुः पुष्टिर्नाट्येषु नैतस्य ॥३५॥
निर्वेदादिरताद्रूप्यादस्थायी स्वदते कथम् ।
वैरस्यायैव तत्पोषस्तेनाष्टौ स्थायिनो मदाः ॥३६॥
वाच्या प्रकरणादिभ्यो बुद्धिस्था वा यथा क्रिया ।
वाक्यार्थः कारकैर्युक्ता स्थायी भावस्तथेतरैः ॥३७॥
रसः स एव स्वाद्यत्वाद्रसिकस्यैव वर्तनात् ।
नानुकायस्य वृत्तत्वात्काव्यस्यातत्परत्वतः ॥३८॥
द्रष्टुः प्रतीतिर्व्रीडेर्ष्यारागद्वेषप्रसङ्गतः ।
लौकिकस्य स्वरमणीसंयुक्तस्येव दर्शनात् ॥३९॥
धीरोदात्ताद्यवस्थानां रामादिः प्रतिपादकः ।
विभावयति रत्यादीन्स्वदन्ते रसिकस्य ते ॥४०॥
ता एव च परित्यक्तविशेषा रसहेतवः ।
क्रीडतां मृन्मयेर्यद्वाद्वालाना द्विरदादिभिः ॥४१॥
स्वोत्साहः स्वदते तद्वच्छ्रोतृणामजुनादिभिः ।
काव्यार्थभावनास्वादो नर्तकस्य न वार्यते ॥४२॥
स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः ।
विकासविस्तरक्षोभविक्षेपैः स चतुर्विधः ॥४३॥
श्रृङ्गारवीरबीभत्सरौद्रेषु मनसः क्रमात् ।
हास्याद्भुतभयोत्कर्षकरुणानां त एव हि ॥४४॥
अतस्तज्जन्यता तेषामत एवावधारणम् ।

शमप्रकर्षोऽनिर्वाच्यो मुदितादेस्तदात्मता ॥४५॥

पदार्थैरिन्दुनिर्वेदरोमाञ्चादिस्वरूपकैः ।

काव्याद्विभावसञ्चार्यनुभावप्रख्यतां गतैः ॥४६॥

भावितः स्वदते स्थायी रसः स परिकीर्तितः ।

लक्षणैक्यं विभावैक्यादभेदाद्रसभावयोः ॥४७॥

रम्यदेशकलाकालवेषभोगादिसेवनैः ॥

प्रमोदात्मा रतिः सैव यूनोरन्योन्यरक्तयोः ।

प्रहृष्यमाणा श्रृङ्गारो मधुराङ्गविचेष्टितैः ॥४८॥

एकोनपञ्चाशदमी हि भावा

युक्त्या निबद्धाः परिपोषयन्ति । (स्थायिनम्)

आलस्यमौग्र्यं मरणं जुगुप्सा

तस्याश्रयाद्वैतविरुद्धमिष्टम् ॥४९॥

अयोगो विप्रयोगश्च सम्भोगश्चेति स त्रिधा ।

तत्रायोगोऽनुरागेऽपि नवयोरेकचित्तयोः ॥५०॥

पारतन्त्र्येण दैवाद्वा विप्रकर्षादसङ्गमः ।

दशावस्थः स तत्रादावभिलाषोऽथ चिन्तनम् ॥५१॥

स्मृतिर्गुणकथोद्वेगप्रलापोन्मादसंज्वराः ।

जडता मरणं चेति दुरवस्थं यथोत्तरम् ॥५२॥

अभिलाषः स्पृहा तत्र कान्ते सर्वाङ्गसुन्दरे ।

दृष्टे श्रुते वा तत्रापि विस्मयानन्दसाध्वसाः ॥५३॥

साक्षात्प्रतिकृतिस्वप्नच्छायामायासु दर्शनम् ।

श्रुतिव्याजात्सखीगीतमागधादिगुणस्तुतेः ॥५४॥

सानुभावाविभावस्तु चिन्ताद्याः पूर्वदर्शिताः ।

दशावस्थत्वमाचार्यैः प्रायोवृत्त्या निदर्शितम् ॥५५॥

महाकविप्रबन्धेषु दृश्यते तदनन्तता।

दृष्टे श्रुतेऽभिलाषाश्च किं नौत्सुक्यं प्रजायते ॥५६॥

अप्राप्तौ किं न निर्वेदो ग्लानिः किं नातिचिन्तनात्।

विप्रयोगस्तु विश्लेषो रूढविस्रम्भयोर्द्विधा ॥५७॥

मानप्रवासभेदेन, मानोऽपि प्रणयेर्ष्ययोः।

तत्र प्रणयमानः स्यात्कोपावसितयोर्द्वयोः ॥५८॥

स्त्रीणाभीर्ष्याकृतो मानः कोपोऽन्यासङ्गिनि प्रिये।

श्रुते वाऽनुमिते दृष्टे, श्रुतिस्तत्र सखीमुखात् ॥५९॥

उत्स्वप्नायितभोगाङ्कगोत्रस्खलनकल्पितः।

त्रिधाऽऽनुमानिको, दृष्टः साक्षादिन्द्रियगोचरः ॥६०॥

यथोत्तरं गुरुः षड्भिरुपायैस्तमुपाचरेत्।

साम्ना भेदेन दानेन नत्युपेक्षारसान्तरैः ॥६१॥

तत्र प्रियवचः साम, भेदस्तत्सख्युपार्जनम्।

दानं व्याजेन भूषादेः, पादयोः पतनं नतिः ॥६२॥

सामादौ तु परिक्षीणे स्यादुपेक्षावधीरणम्।

रभसत्रासहर्षादेः कोपभ्रंशो रसान्तरम् ॥६३॥

कोपचेष्टाश्च नारीणां प्रागेव प्रतिपादिताः।

कार्यतः सम्भ्रमाच्छापात्प्रवासो भिन्नदेशता ॥६४॥

द्वयोस्तत्राश्रुनिःश्वासकार्श्यलम्बालकादिता।

स च भावी भवन् भूतस्त्रिधाद्यो बुद्धिपूर्वकः ॥६५॥

द्वितीयः सहसोत्पन्नो दिव्यमानुषविप्लवात्।

स्वरूपान्यत्वकरणाच्छापजः सन्निधावपि ॥६६॥

मृते त्वेकत्र यत्रान्यः प्रलपेच्छोक एव सः ।
व्याश्रयत्वान्न श्रृङ्गारः, प्रत्यापन्ने तु नेतरः ॥६७॥
प्रणयायोगयोरुत्का, प्रवासे प्रोषितप्रिया ।
कलहान्तरितेर्ष्यायां विप्रलब्धा च खण्डिता ॥६८॥
अनुकूलौ निषेवेते यत्रान्योन्यं विलासिनौ ।
दर्शनस्पर्शनादीनि स संभोगो मुदान्वितः ॥६९॥
चेष्टास्तत्र प्रवर्तन्ते लीलाद्या दश योषिताम् ।
दाक्षिण्यमार्दवप्रेम्णामनुरूपाः प्रियं प्रति ॥७०॥
रमयेच्चाटुकृत्कान्तः कलाक्रीडादिभिश्च ताम् ।
न ग्राम्यमाचरेत्किंचिन्नर्मभ्रंशकरं न च ॥७१॥
वीरः प्रतापावनयाध्यवसायसत्त्व-
मोहाविषादनयविस्मयविक्रमाद्यैः ।
उत्साहभूः स च दयारणदानयोगात्
त्रेधा किलात्र मतिगर्वधृतिप्रहर्षाः ॥७२॥
बीभत्सः कृमिपूतिगन्धिवमथुप्रायैर्जुगुप्सैकभू-
रुद्वेगी रुधिरान्त्रकीकसवसामासादिभिः क्षोभणः ।
वैराग्याज्जघनस्तनादिषु घृणाशुद्धोऽनुभावैर्वृतो
नासावक्रविकूणनादिभिरिहावेगार्तिशङ्कादयः ॥७३॥
क्रोधो मत्सरवैरिवैकृतमयैः पोषोऽस्य रौद्रोऽनुजः
क्षोभः स्वाधरदंशकम्पभृकुटिस्वेदास्यरागैर्युतः ।
शस्त्रोल्लासविकत्थनांसधरणीघातप्रतिज्ञाग्रहै-
रत्रामर्षमदौ स्मृतिश्चपलतासूयौग्र्यवैगादयः ॥७४॥
विकृताकृतिवाग्वेषैरात्मनोऽथ परस्य वा ।

हासः स्यात्परिपोषोऽस्य हास्यस्त्रिप्रकृतिः स्मृतः ॥७५॥

स्मितमिहविकासिनयनं, किञ्चिल्लक्ष्यद्विजं तु हसितं स्यात्।

मधुरस्वरं विहसितं, सशिरःकम्पमिदमुपहसितम् ॥७६॥

अपहसितं सास्राक्षं, विक्षिप्ताङ्गं भवत्यतिहसितम्।

द्वे द्वे हसिते चैषा ज्येष्ठे मध्येऽधमे क्रमशः ॥७७॥

कर्मास्य साधुवादाश्रुवेपथुस्वेदगद्गदाः।

हर्षावेगधृतिप्राया भवन्ति व्यभिचारिणः ॥७९॥

विकृतस्वरसत्त्वादेर्भयभावो भयानकः।

सर्वाङ्गवेपथुस्वेदशोषवैचि त्त्यलक्षणः॥

दैन्यसम्भ्रमसम्मोहत्रासादिस्तत्सहोदरः ॥८०॥

इष्टनाशादनिष्टाप्तौ शोकात्मा करुणोऽनु तम्।

निश्वासोच्छ्वासरुदितस्तम्भप्रलपितादयः ॥८१॥

स्वापापस्मारदैन्याधिमरणालस्यसम्भ्रमाः।

विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ॥८२॥


प्रीतिभक्त्यादयो भावा मृगयाक्षादयो रसाः।

र्ह्षोत्साहादिषु स्पष्टमन्तर्भावान्न कीर्तिताः ॥८३॥

षट्त्रिंशद्भूषणादीनि सामादीन्येकविंशतिः।

लक्ष्यसंध्यन्तराख्यानि सालङ्कारेषु तेषु च ॥८४॥

इति चतुर्थः प्रकाशः


रसः
अद्भुतः → स्मयः
बीभत्सः → जुगुप्सा
भयानकः → भयम्
वीरः → उत्साहः
रौद्रः → क्रोधः
करुणः → शोकः
हास्यः → हासः
शृङ्गारः → रतिः

अर्थप्रकृतिः (५)

(१) बीजम्
(२) बिन्दुः
(३) पताका
(४) प्रकरी
(५) कार्यम्

अवस्था (५)

(१) आरम्भः
(२) यत्नः
(३) प्राप्त्याशा
(४) नियताप्तिः
(५) फलागमः


सन्धिः (५)

(१) मुखम् → अङ्गानि द्वादश (१२)
(२) प्रतिमुखम् → अङ्गानि त्रयोदश (१३)
(३) गर्भः → अङ्गानि द्वादश (१२)
(४) विमर्शः → अङ्गानि त्रयोदश (१३)
(५) उपसंहृतिः → अङ्गानि द्वादश (१२)

अर्थोपक्षेपकाः (५)

(१) विष्कम्भः
(२) चूलिका
(३) अङ्कास्य
(४) अङ्कावतारः
(५) प्रवेशकः

नायिकाकोष्टकम्



अत्र मध्या धीराधीरा इव **धीरा अधीरा धीराधीरा** च इति प्रगल्भापि त्रिविधा पुनरियं **ज्येष्ठाकनिष्ठात्वेन** द्वेधा विभज्यते इत्त्थम् आहत्य द्वादशप्रकारा भवति ।


दशरूपकस्वियदर्शकं कोष्टकम्

रूपकम्	कथा	रसः	नायकः	अङ्काः	वृत्तिः	सन्धिः	नायिका	उदाहरणम्
(१) नाटकम्	प्रसिद्धम्	श्रृङ्गारः, वीरः	उदात्तः राजर्षि, दिव्यः	पञ्च वा दश ५, १०	सात्वती आरभटी भारती	मुखं,प्रतिमुखं, गर्भः,विमर्शः उपसंहृतिः		अभिज्ञानशाकुन्तलम् ।
(२) प्रकरणम्	लोकसंश्रया , कल्पिता	श्रृङ्गारः	धीरप्रशान्तः(अमात्यवि प्रव-णिजामेकः)	-	नाटकवत्	नाटकवत्	कुलस्त्री गणीका	मृच्छकटिकम्
(३) भाणः	धूर्तचरितम्	श्रृङ्गारवीरौ	विटः	१	भारती	मुख-निर्वहणे		लीलामधुकरः
(४) प्रहसनम्	धूर्तचरितम्	हास्य	पाखण्डी, ब्राह्मणः	१	भारती	भाणवत्		हास्यचूडामणिः लटकमेलकम्
(५) डिमः	प्रसिद्धम्	रौद्रः	देव-गन्धर्व-यक्ष-राक्षस-नागेषु एकः	४	सात्वती आरभटी भारती	मुखं,प्रतिमुखं, गर्भः, उपकंहृतिः		त्रिपुरदाहः
(६) व्यायोगः	इतिहास-गृहीतम्	रौद्रः	ख्यातः, उद्धतप्रकृतिकः	१	डिमवत्	मुखं,प्रतिमुखं, उपकंहृतिः		मध्यम-व्यायोगः
(७) समवकारः	प्रसमद्धम् देवासुरम्	वीरः	देवः, दानवः	३	सात्वती आरभटी भारती	व्यायोगवत्		समुद्रमन्थनम्


(८) वीथी	कल्पिता	श्रृङ्गारः	•कोऽपि	१	कैशिकी	मुखनिर्वहणे		मालविका
(९) अङ्कः	ऐतिहासिकं , प्रसिद्धम्	करुणः	प्राकृताः नराः	१		मुखनिर्वहणे		शर्मिष्ठाययातिः
(१०) ईहामृगः	काल्पनिकं, प्रख्यातम्	श्रृङ्गारः	धीरोद्धतौ नरदिव्यौ	४		मुख-प्रतिमुख-निर्वहणानि		कुसुमशेखरविजयः

नायककोष्टकम्

नायकः





शृङ्गारनायकः



एतेषां दक्षिणादिचतुर्णां धीरललितादिभिः चतुर्भिः गुणनेन **षोडशविधः** नायकः भवति ।

वृत्तिः (४)


कैशिकी
सात्वती
आरभटी
भारती
नर्म
नर्मस्फिञ्जः
नर्मस्फोटः
नर्मगर्भः
(१)संक्षिप्तिकः
(२)सम्फेटः
(३)वस्तूत्थापनम्
(४)अवपातः
(१)संलापकः
(२)उत्थापकः
(३)साङ्घात्यः
(४)परिवर्तकः
प्ररोचना
वीथी
प्रहसनम्
आमुखम्



Shree Somnath Sanskrit University - Veraval

Pin - 362 266, Gujarat, India. Ph. : 02876 - 244532 Fax : 244417

e-mail : sssu.veraval@gmail.com, www.shreesomnathsanskrituniversity.info